कविकुलगुरु - कालिदास - संस्कृत - विश्वविद्यालयः

This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

कविकुलगुरु कालिदास संस्कृत विश्वविद्यालय, रामटेक
हस्तलिखित संग्रह

दाखल क्र. M-2482 विषय __________.
नांव निरूक्त उत्तरषट्क.
लेखक/लिपीकार __________.
पृष्ठ 72.
काळ __________ [✓ पूर्ण]/अपूर्ण __________.

M·2482

अथनिरुक्तउत्तरषट्कप्रारंभः

नि०उ०
१

॥श्रीगणेशायनमः॥ॐ॥भू॥अथातोदैवतंतद्यानिनामानिप्राधान्यस्तुतीनांदेवतानांतदै
वतमित्याचक्षतेसैषादेवतोपपरीक्षायत्कामऋषिर्यस्यांदेवतायामार्थपत्यमिच्छंस्तुतिंप्र
युंक्ते·तद्देवतःसमंत्रोभवतितास्त्रिविधाऋचः·परोक्षकृताःप्रत्यक्षकृताआध्यात्मिक्यश्च
तत्रपरोक्षकृताःसर्वाभिर्नामविभक्तिभिर्युज्यंतेप्रथमपुरुषैश्चाख्यातस्य॥१॥इंद्रोदिव
इंद्रईशेपृथिव्याइंद्रमिद्गाथिनोबृहदिंद्रेणैतेतृत्सवोवेविषाणाइंद्रायसामगायतनेंद्रादृ
तेपवतेधामकिंचनेंद्रस्यनुवीर्याणिप्रवोचमिंद्रेकामाअयंसतेत्यथप्रत्यक्षकृतामध्यमपु
रुषयोगास्त्वमितिचैतेनसर्वनाम्नात्वमिंद्रबलादधिविनइंद्रमृधोजहीत्यथापिप्रत्यक्ष
कृताःस्तोतारोभवंतिपरोक्षकृतानिस्तोतव्यानिमाचिदन्यद्विशंसतकण्वाअभिप्रगाय
तोपप्रेतकुशिकाश्चेतयध्वमित्यथाध्यात्मिक्यउत्तमपुरुषयोगाअहमितिचैतेनसर्वना

राम
१

म्नायथैतदिंद्रोवैकुंठोलवसूक्तंवागांभृणीयमिति ॥२॥ परोक्षकृताः प्रत्यक्षकृताश्चमंत्राभूयिष्ठाअल्पशआध्यात्मिकाअथापिस्तुतिरेवभवतिनाशीर्वादइंद्रस्यनुवीर्याणिप्रवोचमितियथैतस्मिन्सूक्तेथाप्याशीरेवनस्तुतिः सुचक्षाअहमक्षीभ्यांभूयासंसुवर्चामुखेनसुश्रुत्कर्णाभ्यांभूयासमितितदेतद्बहुलमाध्वर्यवेयाज्ञेषुचमंत्रेष्वथापिशपथाभिशापौ। अद्यामुरीययदियातुधानोअस्मि। अथासवीरैर्दशभिर्वियूयाइत्यथापिकस्यचिद्भावस्याचिख्यासा। नमृत्युरासीदमृतंनतर्हि। तमआसीत्तमसागूळ्हमग्रे। अथापिपरिदेवनाकस्माच्चिद्भावात्। सुदेवोअद्यप्रपतेदनावृत्। नविजानामियदिवेदमस्मीत्यथापिनिंदाप्रशंसे। केवलाघोभवतिकेवलादी। भोजस्येदंपुष्करिणीववेश्मेत्येवमक्षसूक्तेद्यूतनिंदाचकृषिप्रशंसाचैवमुच्चावचैरभिप्रायैरृषीणांमंत्रदृ

ष्टयोभवंति॥३॥तद्येनादिष्टदेवतामंत्रास्तेषुदेवतोपपरीक्षायद्देवतःसयज्ञोवायज्ञांगंवा
तद्देवताभवंत्यथान्यत्रयज्ञात्प्राजापत्याइतियाज्ञिकानाराशंसाइतिनैरुक्ताअपिवासाकामदे
वतास्यात्प्रायोदेवतावास्तिह्याचारोबहुलंलोकेदेवदेवत्यमतिथिदेवत्यंपितृदेवत्यंयाज्ञदैव
तोमंत्रइत्यपिह्यदेवतावत्स्तूयंतेयथाश्वप्रभृतीन्योषधिपर्यंतान्यथाप्यष्टौद्वंद्वानिसनम
न्येतागंतूनिवार्थान्देवतानांप्रत्यक्षदृश्यमेतद्भवतिमाहाभाग्याद्देवतायाएकआत्माबहुधा
स्तूयतएकस्यात्मनोन्येदेवाःप्रत्यंगानिभवंत्यपिचसत्वानांप्रकृतिभूमभिर्ऋषयःस्तुवंती
त्याहुःप्रकृतिसार्वनाम्न्याच्चेतरेतरजन्मानोभवंतीतरेतरप्रकृतयःकर्मजन्मानआत्मजन्मा
नआत्मैवैषांरथोभवत्यात्माश्वाआत्मायुधमात्मेषवआत्मासर्वंदेवस्यदेवस्य॥४॥तिस्र
एवदेवताइतिनैरुक्ताअग्निःपृथिवीस्थानोवायुर्वेंद्रोवांतरिक्षस्थानःसूर्योद्युस्थानस्तासां

माहाभाग्यादेकैकस्या अपिबहूनिनामधेयानिभवंत्यपिवाकर्मपृथक्त्वाद्यथाहोताध्वर्युर्ब्र
ह्मोद्गातेत्यप्येकस्यसतोऽपिवापृथगेवस्युः पृथग्घिस्तुतयोभवंतितथाभिधानानियथोए
तत्कर्मपृथक्त्वादितिबहवोऽपिविभज्यकर्माणिकुर्युस्तत्रसंस्थानैकत्वंसंभोगैकत्वंचोपे
क्षितव्यंयथापृथिव्यांमनुष्याःपशवोदेवाइतिस्थानैकत्वंसंभोगैकत्वंचदृश्यतेयथापृ
थिव्याःपर्जन्येनचवाय्वादित्याभ्यांचसंभोगोऽग्निनाचैतरस्यलोकस्यतत्रैतन्नरराष्ट्रमिव॥
५॥ अथाकारचिंतनंदेवतानांपुरुषविधाःस्युरित्येकंचेतनावद्धिस्तुतयोभवंतितथाभि
धानान्यथापिपौरुषविधिकैरंगैःसंस्तूयंते॥ ऋष्वातइंद्रस्थविरस्यबाहूयत्संगृभ्णाम
घवन्काशिरित्ते। अथापिपौरुषविधिकैर्द्रव्यसंयोगैः॥ आद्वाभ्यांहरिभ्यामिंद्रयाहि। कल्या
णीर्जायासुरणंगृहेते। अथापिपौरुषविधिकैःकर्मभिः। अद्धींद्रपिबचप्रस्थितस्याश्रु

त्कर्णश्रुधीहवं।अपुरुषविधास्युरित्यपरमऽपितुयद्दृश्यते।।६।।अपुरुषविधंतद्यथाऽग्निर्वा
युरादित्यः पृथिवीचंद्रमाइऽतियथोएतच्चेतनावद्वऽद्धिस्तुतयोभवंतीत्यचेतनान्यप्येवंस्तूयंतेय
थाक्षप्रभृतीन्योषऽधिपर्यंताऽनियथोएतत्पौरुषविऽधिकैरंऽगैः संस्तूयंतइत्यचेतनेष्वप्येतद्भव
त्यभिक्रंदंतिहरितेभिरासभिरिऽतिग्रावस्तुतिर्यथोएतत्पौरुषविधिकैर्द्रव्यसंयोगैरित्ये
तदऽपितादृशमेवसुखंरथंयुयुजेसिंधुरश्विनमिऽतिनदीस्तुतिर्यथोएतत्पौरुषविधिकैःक
र्मभिरित्येतदऽपितादृशमेवहोतुश्चित्पूर्वेहविरद्यमाशतेतिग्रावस्तुतिरेवाऽपिवोभयविधा
स्युरपिवापुरुषविधानामेवसतांकर्मात्मानएतेस्युर्यथायज्ञोयजमानस्यैषचाख्यानसम
यः।।७।।तिस्रएवदेवताइत्युक्तंपुरस्तात्तासांभक्तिसाहचर्यंव्याख्यास्यामोऽथैतान्यग्निभक्ती
न्ययंलोकःप्रातःसवनंवसंतोगायत्रीत्रिवृत्स्तोमोरथंतरंसामयेचदेवगणाःसमाम्नाता।१

प्रथमेस्थानेग्नायीपृथिवीलोकेतिस्त्रियोथास्यकर्मवहनंचहविषामावाहनंचदेवतानांयच्च
किंचिद्दार्ष्टविषयिकमग्निकर्मैवतद्थास्यसंस्तविकादेवाइंद्रःसोमोवरुणःपर्जन्यऋत
वआग्नावैष्णवंहविर्नत्वृक्संस्तविकीदशतयीषुविद्यतेऽथाप्याग्नापौष्णंहविर्नतुसंस्तव
स्तत्रैतांविभक्तिस्तुतिमृचमुदाहरंति॥८॥पूषात्वेतश्च्यावयतुप्रविद्वाननष्टपशुर्भुवनस्य
गोपाः॥सत्वैतेभ्यःपरिददसितृभ्योग्निर्देवेभ्यःसुविदत्रियेभ्यः॥पूषात्वेतःप्रच्यावयतुवि
द्वाननष्टपशुर्भुवनस्यगोपाइत्येषहिसर्वेषांभूतानांगोपायितादित्यःसत्वैतेभ्यःपरिददत्सि
तृभ्यइतिसांशयिकःस्तृतीयःपादः॥पूषापुरस्तात्तस्यान्वादेशइत्येकमग्निरुपरिष्टात्तस्यप्र
कीर्तनेत्यपरं॥अग्निर्देवेभ्यःसुविदत्रियेभ्यः॥सुविदत्रंधनंभवतिविंदतेर्वैकोपसर्गाद्ददा
तेर्वास्याद्व्युपसर्गात्॥९॥अथैतानींद्रभक्तीन्यंतरिक्षलोकोमाध्यंदिनंसवनंग्रीष्मस्त्रिष्टु

प्पंचदशस्तोमोबृहत्सामयेचदेवगणाःसमाम्नातामध्येमेस्थानेयाश्चस्त्रियोथास्यकर्मर
सानुप्रदानंवृत्रवधोयाचकाचबलकृतिरिंद्रकर्मैवतदथास्यसंस्तविकादेवाअग्निःसोमो
वरुणःपूषाबृहस्पतिर्ब्रह्मणस्पतिःपर्वतःकुत्सोविष्णुर्वायुरथापिमित्रो
वरुणेनसंस्तूयतेपूष्णारुद्रेणचसोमोग्निनाचपूषावातेनचपर्जन्यः॥१०॥अथैतान्यादि
त्यभक्तीन्यसौलोकस्तृतीयसवनंवर्षाजगतीसप्तदशस्तोमोवैरूपंसामयेचदेवगणाःस
माम्नाताउत्तमेस्थानेयाश्चस्त्रियोथास्यकर्मरसादानंरश्मिभिश्चरसधारणंयच्चकिंचि
त्प्रवल्हितमादित्यकर्मैवतच्चंद्रमसावायुनासंवत्सरेणेतिसंस्तवएतेष्वेवस्थानव्यूहेष्वृ
तुछंदस्तोमपृष्ठस्यभक्तिशेषमनुकल्पयीतशरदनुष्टुबेकविंशस्तोमोवैराजंसामेतिपृथि
व्यायतनानिहेमंतःपंक्तिस्त्रिणवस्तोमःशाकरंसामेत्यंतरिक्षायतनानिशिशिरोतिछं

दास्त्रयस्त्रिंशस्तोमोरैवतंसामेतिद्युभक्तीनि॥११॥मंत्रामननाच्छंदांसिच्छादनात्स्तोम
स्तवनाद्यजुर्यजतेःसामसंमितमृचास्यतेर्वर्चासमंमेनइतिनैदानागायत्रीगायतेःस्तुति
कर्मणस्त्रिगमनावाविपरीतागायतोमुखादुदपतदितिचब्राह्मणमुष्णिगुत्स्नाताभव
तिस्निह्यतेर्वास्यात्कांतिकर्मणउष्णीषिणीवेत्यौपमिकमुष्णीषंस्नायतेःककुप्ककुभि
नीभवतिककुप्चकुब्जश्चकुजतेर्वोब्जतेर्वानुष्टुबनुष्टोभनाद्गायत्रीमेवत्रिपदांसतींच
तुर्थेनपादेनानुष्टोभतीतिचब्राह्मणंबृहतीपरिबर्हणात्पंक्तिःपंचपदात्रिष्टुप्स्तोभत्युत्तर
पदाकातुत्रितास्यात्तीर्णतमंछंदस्त्रिवृद्वज्रस्तस्यस्तोभतीतिवायत्त्रिरस्तोभत्तत्त्रिष्टुभस्त्रि
ष्टुप्त्वमितिविज्ञायते॥१२॥जगतीगततमंछंदोजलचरगतिर्वाजल्गल्यमानोसृजदिति
चब्राह्मणंविराड्विराजनाद्वाविराधनाद्वाविप्रापणाद्वाविराजनात्संपूर्णाक्षराविराधनादू

नास्मराविभापणादधिकास्मरापिपीलिकमध्येत्यौपमिकंपिपीलिकापेलतेर्गतिकर्मणइ
तीमादेवताअनुक्रांताः सूक्तभाजोहविर्भाजऋग्भाजश्चभूयिष्ठाः काश्चिंनिपातभाजोथो
ताभिधानैः संयुज्यहविश्चोदयतींद्रायवृत्रघ्नइंद्रायवृत्रतुरइंद्रायांहोमुचइतितान्यप्येके
समामनंतिभूयांसितुसमाम्नानायत्तुसंविज्ञानभूतंस्यात्प्राधान्यस्तुतितत्समामनेथोत
कर्मभिर्ऋषिर्देवतास्तौतिवृत्रहापुरंदरइतितान्यप्यकेसमामनंतिभूयांसितुसमाम्नाना
व्यंजनमात्रंतुतत्तस्याभिधानस्यभवतियथाब्राल्मणायबुभुक्षितायौदनंदेहिस्नातायानु
लेपनंपिपासतेपानीयमिति ॥१३॥ अथातोनुक्रमिष्यामोग्निःपृथिवीस्थानस्तंप्रथमं
व्याख्यास्यामोग्निः कस्मादग्रणीर्भवत्यग्रंयज्ञेषुप्रणीयतेंगनयतिसंनममानोक्नोपनो
भवतीतिस्थौलाष्ठीविर्नक्नोपयतिनस्नेहयतित्रिभ्यआख्यातेभ्योजायतइतिशाकपूणि

रितादक्ताद्दग्धाद्वानीतात्सखल्वेतेरकारमादत्तेगकारमनक्तेर्वादहतेर्वानीःपरस्तस्यैषा
भवति ॥१४॥ अग्निमीळेपुरोहितंयज्ञस्यदेवमृत्विजं। होतारंरत्नधातमं ॥ अग्निमीळे
ग्निंयाचामीळिरध्येषणाकर्मापूजाकर्मावापुरोहितोव्याख्यातोयज्ञश्चदेवोदानाद्वादी
पनाद्वाद्योतनाद्वाद्युस्थानोभवतीतिवायोदेवःसादेवताहोतारंह्वातारंजुहोतेर्होतेत्यौ
र्णवाभोरत्नधातमंरमणीयानांधनानांदातृतमंतस्यैषापराभवति ॥१५॥ अग्निःपूर्वेभि
र्ऋषिभिरीड्योनूतनैरुत। सदेवांएहवक्षति ॥ अग्निर्यःपूर्वैर्ऋषिभिरीळितव्योवंदित
व्योस्माभिश्चनवतरैःसदेवानिहावहत्वितिसनमन्येतायमेवाग्निरित्यप्येतेउत्तरेज्योति
षीअग्नीउच्येतेततोनुमध्यमः ॥१६॥ अभिप्रवंतसमनेवयोषाःकल्याण्यःस्मयमाना
सोअग्निं। घृतस्यधाराःसमिधोनसंतताजुषाणोहर्यतिजातवेदाः। अभिनवंतसमनस

इवयोषाःसमनंसमनाद्धासंमाननाद्वाकल्याण्यःस्मयमानासो अग्निमित्यौपमिकंघृतस्य
धाराउदकस्यधाराःसमिधोनसंतननसन्तिराप्नोतिकर्मावानमतिकर्मावा।नाज्जुषाणोहर्य
तिजातवेदाः।हर्यतिःप्रेप्साकर्मा।विहर्यतीतिसमुद्रादूर्मिर्मधुमांउदारदित्यादित्यमुक्तंम
न्यंतेसमुद्राध्येषोद्भ्यउदेतीतिचब्राह्मणं।अथापिब्राह्मणंभवत्यग्निःसर्वादेवताइतितस्यो
त्तराभूयसेनिर्वचनाय॥१७॥इंद्रंमित्रंवरुणमग्निमाहुरथोदिव्यःससुपर्णोगरुत्मान्।
एकंसद्विप्राबहुधावदंत्यग्निंयमंमातरिश्वानमाहुः।इममेवाग्निंमहांतमात्मानमेकमा
त्मानंबहुधामेधाविनोवदंतींद्रंमित्रंवरुणमग्निंदिव्यंचगरुत्मंतं।दिव्योदिविजोगरुत्मान्ग
रणवान्गुर्वात्मामहात्मेतिवायस्तुसूक्तंभजतेयस्मैहविर्निरुप्यतेयमेवसोग्निर्निपातमे
वैतेउत्तरेज्योतिषीएतेननामधेयेनभजेते॥१८॥जातवेदाःकस्माज्जातानिवे

नंऽविदुर्जातेजातेऽविद्यंतइतिवाजातऽवित्तोवाजातधनोजातऽविद्योवाजातप्रज्ञानोयत्तज्जा
तःपशूनऽविंदंतेऽतितज्जातवेदसोजातवेदस्त्वऽमितिब्राह्मणंतस्मात्सर्वानृतून्पशवोऽग्निम
भिसर्पंतीऽतिचतस्यैषाभवति ॥१९॥ प्रनूनंजातवेदसमश्वंऽहिनोतवाजिनं। इदंनोबर्हि
रासदे। प्रऽहिणुतजातवेदसंकर्मऽभिः समश्नुवानमऽपिवोपमार्थेस्यादश्वऽमिवजातवेद
समितीदंनोबर्हिरासीदऽत्विऽतितदेतदेकमेवजातवेदसंगायत्रंतृचंदशतयीषुऽविद्यतेयत्तु
ऽकिंऽचिदाग्नेयंतज्जातवेदसानांस्थानेयुज्यतेसनमन्येतायमेवाऽग्निऽरित्यप्येतेउत्तरेज्यो
ऽतिषीजातवेदसीउच्यतेततोनुमध्यमः ॥ अभिप्रवंतसमनेवयोषाइतितत्पुरस्ताद्व्या।ऽ
ख्यातमथासावादित्यउदुत्यंजातवेदसऽमितितदुपऽरिष्टाद्व्याख्यास्यामोयस्तुसूक्तंभजते
यस्मैहविर्निरुप्यतेऽयमेवसोऽग्निर्जातवेदाऽनिपातमेवैतेउत्तरेज्योऽतिषीएतेननामधेयेन

भजेते ॥२०॥ वैश्वानरः कस्माद्विश्वान्नरान्नयति विश्व एनं नरा नयंतीति वा । अपि वा विश्वान
र एव स्यात्प्रत्यृतः सर्वाणि भूतानि तस्य वैश्वानरस्तस्यैषा भवति ॥२१॥ वैश्वानरस्य सुमतौ
स्याम राजा हि कं भुवनानामभिश्रीः । इतो जातो विश्वमिदं विचष्टे वैश्वानरो यतते सूर्येण ।
इतो जातः सर्वमिदमभिविपश्यति वैश्वानरः संयतते सूर्येण राजा यः सर्वेषां भूतानाम
भिश्रयणीयस्तस्य वैश्वानरस्य कल्याण्यां मतौ स्यामेति तत्को वैश्वानरो मध्यम इत्याचार्या
वर्षकर्मणा ह्येनं स्तौति ॥२२॥ प्र नू महित्वं वृषभस्य वोचं यं पूरवो वृत्रहणं सचंते । वैश्वान
रो दस्युमग्निर्जघन्वां अधूनोत्काष्ठा अव शंबरं भेत् । प्रब्रवीमि तन्महत्वं माहाभाग्यं वृष
भस्य वर्षितुरपां यं पूरवः पूरयितव्या मनुष्या वृत्रहणं मेघहनं सचंते सेवंते वर्षकामा दस्यु
र्दस्यतेः क्षयार्थादुपदस्यंत्यस्मिन्रसा उपदासयति कर्माणि तमग्निर्वैश्वानरो घ्नन्नवाधू

नोदपःकाष्ठाऽअभिनछंबरंमेघमथासावाऽदित्यइतिपूर्वैर्याऽज्ञिकाऽएषांलोकानांरोहएस
वनानांरोहआम्नातोरोराऽत्रत्यवरोहश्चैकाऽर्षैतस्तामनुकूऽतिंहोताऽग्निमारुतेशस्त्रेवैश्वा
नरीयेणसूक्तेनप्रतिपद्यतेसोऽपिनःस्तोऽत्रियमाऽह्रियेताऽग्नेयोऽहिभवतिततआगछतिमध्य
स्थानादेवनारुद्रंचमरुतश्चततोऽग्निमिहस्थानमत्रैवस्तोऽत्रियंशंसतस्तथाऽपिवैश्वानरी
योद्वादशकपालोभवत्येतस्यहिद्वादशाऽवधंकमीपाऽपिप्राप्तमेवंभवत्यसौवाआऽदित्यो
ऽग्निर्वैश्वानरइत्यथाऽपिऽनेऽवत्सोऽयंवैश्वानरोऽभवत्सायोद्यांभात्सापृथिवीऽमित्येषहिद्यावा
पृथिव्यावाभासयत्तथाऽपिछांदोऽमिकंसूक्तंसोऽयंवैश्वानरंभवतिदिविपृष्टोअरोचतेत्ये
षहिदिविपृष्टोअरोचतेतथाऽपिहविष्पांतीयंसूक्तंसोऽयंवैश्वानरंभवत्ययमेवाऽग्निर्वैश्वा
नरइतिशाकपूर्णिर्वैश्वानराऽवित्यप्येतेउत्तरेज्योऽतिषीवैश्वानरोऽयंयत्ताभ्यांजायतेकथ

नि० उ०
८

न्वयमेताभ्यांजायतइतियत्रैवैघुलःशरणमभिहरंतियावदनुपात्तोभवतिमध्यमधर्मैवता
वद्भवत्युदकेंधनःशरीरोपशमनउपादीयमानएवायंसंपद्यतउदकोपशमनःशरीरदी
प्तिरथादित्यादुदीचिप्रथमसमावृत्तआदित्येकंसंवामणिंवापरिमृज्यप्रतिस्वरेयत्रसु
ष्कगोमयमसंस्पर्शयंधारयतितत्प्रदीप्यतेसोयमेवसंपद्यतेऽथाप्याहवैश्वानरोयततेसू
र्येणेतिनचपुनरात्मनात्मानंसंयततेन्येनैवान्यःसंयततइतइममादधात्यमुतोमुष्यर
श्मयःप्रादुर्भवंतीतोस्यार्चिषस्तयोर्भासोःसंसर्गंदृष्ट्वैवमवक्ष्यदथयान्येतान्यौत्तमिका
निसूक्तानिभागानिवासावित्राणिवासौर्याणिवापौष्णानिवावैष्णवानिवावैश्वदेव्यानि
वातेषुवैश्वानरीयाःप्रवादाअभविष्यन्नादित्यकर्मणाचैनमस्तोष्यन्नित्युदेषीत्यस्त
मेषीतिविपर्येषीत्याग्नेयेष्वेवहिसूक्तेषुवैश्वानरीयाःप्रवादाभवंत्यग्निकर्मणाचैनंस्तौ

राम्
८

तीति वहसीति पचसीति दहसीति यथो एतद्धूर्षकर्मणात्येनं स्तोतीत्यस्मिन्नप्येतदुपपद्यते ॥ समानमेतदुदकमुच्चैत्यव चाहभिः । भूमिं पर्जन्या जिन्वन्ति दिवं जिन्वन्त्यग्नय इति सा निगदव्याख्याता ॥ २३ ॥ कृष्णं नियानं हरयः सुपर्णा अपो वसाना दिवमुत्पतन्ति । त आववृत्रन्त्सदनादृतस्यादिद्घृतेन पृथिवी व्युद्यते ॥ कृष्णं निरयणं रात्रिरादित्यस्य हरयः सुपर्णा हरणा आदित्यरश्मयस्ते यदामुतोर्वाञ्चः पर्यावर्तन्ते सह स्थानादुदकस्यादित्यादथ घृतेनोदकेन पृथिवी व्युद्यते घृतमित्युदकनाम जिघर्तेः सिंचतिकर्मणो ऽथापि ब्राह्मणं भवत्यग्निर्वा इतो वृष्टिं समीरयति धामच्छदिव खलु वै भूत्वा वर्षति मरुतः सृष्टां वृष्टिं नयन्ति यदा खलु वा असावादित्यो न्यङ् रश्मिभिः पर्यावर्ततेऽथ वर्षतीति यथो एतद्रोहात्प्रत्यवरोहश्चिकीर्षित इत्याम्नायवचनादेतद्भवतीति यथो एतद्वैश्वानरीयो

नि०उ०
१

द्वादशकपालोभवतीत्यनिर्वचनंकपालानिभवंत्यस्तिहिसोर्यएककपालःपंचकपालश्चयथो
एतद्ब्राह्मणंभवतीतिबहुभक्तिवादीनिहिब्राह्मणानिभवंतिपृथिवीवैश्वानरःसंवत्सरोवैश्वा
नरोब्राह्मणोवैश्वानरइतियथोएतन्निवित्सोर्यवैश्वानरीभवतीत्यस्यैवसाभवतियोविड्भ्योमा
नुषीभ्योदीदिदित्येषहिविड्भ्योमानुषीभ्योदीप्यतेयथोएतच्छांदोमिकंसूक्तंसोर्यवैश्वानरं
भवतीत्यस्यैवतद्भवतिजमदग्निभिराहुतइतिजमदग्नयःप्रजमिताग्नयोवाप्रज्वलिताग्न
योवातैरभिहुतोभवतियथोएतद्धविष्पांतीयंसूक्तंसोर्यवैश्वानरंभवतीत्यस्यैवतद्भवति॥
॥२४॥हविष्पांतमजरंस्वर्विदिदिविस्पृश्याहुतंजुष्टमग्नौ।तस्यभर्मणेभुवनायदेवाधर्मणे
कंस्वधयापप्रथंत।हविर्यत्पानीयमजरंसूर्यविदिदिविस्पृश्यमभिहुतंजुष्टमग्नौतस्यभरणाय
चभावनायचधारणायचैतेभ्यःसर्वेभ्यःकर्मभ्योदेवाइममग्निमग्नेनापप्रथंताथाप्याह॥२५

राम्
१

अपामुपस्थेमहिषा अगृभ्णतविशोराजानमुपतस्थुर्ऋग्मियं । आदूतोअग्निमभरद्विव
स्वतोवैश्वानरंमातरिश्वापरावतः ।। अपामुपस्थउपस्थानेमहत्यंतरिक्षलोकआसीनाम
हांतइतिवा । एतमाध्यमिकादेवगणा । विशइवराजानमुपतस्थुर्ऋग्मियमृग्मंतमितिवाऽ
र्चनीयमितिवापूजनीयमितिवाहरद्यंदूतोदेवानां । विवस्वतआदित्याद्विवस्वान्विवासनवा
न्प्रेरितवतः परागताद्वा । ऽपिवास्याग्नेर्वैश्वानरस्यमातरिश्वानमाहर्त्तारमाहमातरिश्वावा
युर्मातर्यंतरिक्षेश्वसितिमातर्यश्वानितीतिवाऽथैनमेताभ्यांसर्वाणिस्थानान्यभ्यापादंलो
ति ।। २६ ।। मूर्धाभुवोभवतिनक्तमग्निस्ततःसूर्योजायतेप्रातरुद्यन् । मायामूतुयज्ञियाना
मेतामपोयत्तूर्णिश्चरतिप्रजानन् । मूर्धामूर्त्तमस्मिन्धीयतेमूर्धायःसर्वेषांभूतानांभवति
नक्तमग्निस्ततःसूर्योजायतेप्रातरुद्यन्त्सएवप्रज्ञांत्वेतांमन्यंतेयज्ञियानांदेवानांयज्ञसंपा

नि०उ०
१०

र्हिनामपोयत्कर्म्मचरतिप्रजानन्त्सर्वाणिरूपाणान्यनुसंचरतित्वरमाणस्तस्योत्तराभूय
सेनिर्वचनाय॥२७॥स्तोमेनहिदिविदेवासोअग्निमजीजनञ्छक्तिभीरोदसिप्रां॥तमूअ
कृण्वंत्रेधाभुवेकंसओषधीःपचतिविश्वरूपाः॥स्तोमेनयंहिदिविदेवासोअग्निमजन
यञ्छक्तिभिःकर्मभिर्द्यावापृथिव्योरापूरणंतमकुर्वंस्त्रेधाभावायपृथिव्यामंतरिक्षेदिवीति
शाकपूणिर्यदस्यदिवितृतीयंतदसावादित्यइतिहिब्राह्मणंतदग्नीहृत्यस्तौत्यथैनमेत
यादित्यीकृत्यस्तौति॥२८॥यदेदेनमदधुर्यज्ञियासोदिविदेवाःसूर्यमादितेयं॥यदाच
रिष्णूमिथुनावभूतामादित्प्रापश्यन्भुवनानिविश्वा॥यदेनमदधुर्यज्ञियाःसर्वेदिविदे
वाःसूर्यमादितेयमदितेःपुत्रंयदाचरिष्णूमिथुनौप्रादुरभूतांसर्वदासहचारिणावुषाश्चा
दित्यश्चमिथुनौकस्मान्मिनोतिश्रयतिकर्मणोमिथुइतिनामकरणस्थकारोवानयतिःपरोव

राम
१०

ऽनिर्वासिमाश्रितावन्योन्यंनयतोवनुतोवामनुष्यमिथुनावप्येतस्मादेवमेथंतावन्योन्यंव
नुतइतिवाथेनमेतयाग्नीकृत्यस्तौति॥२९॥यत्रावदेतेअवरःपरश्चयज्ञन्योःकतरोनौवि
वेद।आसेकुरत्सधमादंसखायोनक्षंतयज्ञंकइदंविवोचत्॥यत्रविवदेतेदैव्योहोतारा
वयंचाग्निरसौचमध्यमःकतरोनौयज्ञेभूयोवेदेत्याशक्नुवंतिलत्सहमदनंसमानाख्याना
ऋत्विजस्तेषांयज्ञंसमश्नुवानं।कोनइदंविवक्ष्यतीतितस्योत्तराभूयसेनिर्वचनाय॥३०
॥यावन्मात्रमुषसोनप्रतीकंसुपर्ण्यो३वसतेमातरिश्वः॥तावद्दधात्युपयज्ञमायन्ब्रा
ह्मणोहोतुरवरोनिषीदन्॥यावन्मात्रमुषसःप्रत्यक्तंभवतिप्रतिदर्शनमितिवाऽस्त्युप
मान्यस्यसंप्रत्यर्थेप्रयोगइहेवनिधेहीतियथासुपर्ण्यःसुपतनाएतारात्रयोवसतेमात
श्वंज्योतिर्वर्णस्यतावदुपदधातियज्ञमागच्छन्ब्राह्मणोहोतास्याग्नेर्होतुरवरोनिषीदन्हो

नि॰उ॰
११

रजपरस्त्वनग्निर्वैश्वानरीयोभवतिदेवसवितरेतंत्वावृणतेऽग्निंहोत्रायसहपित्र्यावैश्वान
रेणेतीममेवाग्निंसवितारमाहसर्वस्यप्रसवितारंमध्यमंवोत्तमंवापितरयस्तुसूक्तंभज
तेयस्मैहविर्निरुप्यतेयमेवसोऽग्निर्वैश्वानरोऽनिपातमेवैतेउत्तरेज्योतिषीएतेननामधेये
नभजेतेनभजेते ॥३१॥ इतिनिरुक्तेउत्तरषट्केप्रथमोध्यायः॥ ॥अथातोदैवतंमंत्राद्दि
वःपरोक्षकृतास्त्वयेतिस्रोथाकारश्चिंतनमपुरुषविधंतानिस्तएवदेवताइत्युक्तंभूषात्वाथै
तानींद्रभक्तीन्यथैतान्यादित्यभक्तीनिमंत्रामननाज्जगतीगततममथातोनुक्रमिष्यामो
ऽग्निमीळेऽग्निःपूर्वेभिरभिप्रवंतेहंऽभित्रंजातवेदाःकस्मात्सनूनंजातवेदसंवैश्वानरःक
स्माद्वैश्वानरस्यप्रनूमहित्वंकृष्णनियानंहविष्पांतमपामुपस्थेमूर्द्धाभुवःस्तोमेनहिय
देदेनंयत्रावदेतेयावन्मात्रमेकत्रिंशत् ॥ ॐ ॥ द्रविणोदाःकस्माद्धनंद्रविणमुच्यतेयदे

राम
११

दनभिद्रवंतिबलंवाद्रविणंयदेनेनाभिद्रवंतितस्यदाताद्रविणोदास्तस्यैषाभवति॥१॥
द्रविणोदाद्रविणसोग्रावहस्तासोअध्वरे॥यज्ञेषुदेवमीळते॥द्रविणोदायस्त्वंद्रविणस
इतिदविणसादिनइतिवाद्रविणसानिनइतिवाद्रविणसस्तस्मात्पिबत्वितिवा।यज्ञेषु
देवमीळते।याचंतिस्तुवंतिवर्धयंतिपूजयंतीतिवातत्कोद्रविणोदाइंद्रइतिक्रौष्टुकिःस
बलधनयोर्दातृतमस्तस्यचसर्वाबलकृतिरोजसोजातमुतमन्यएनमितिचाहाऽथाप्यग्निं
द्राविणोदसमाहैषपुनरेतस्माज्जायते॥योअश्मनोरंतरग्निंजजानेत्यपिनिगमोभवत्य
थाप्यृतुयाजेषुद्राविणोदसाःप्रवादाभवंतितेषांपुनःपात्रस्यैंद्रपानमितिभवत्यथाप्ये
नंसोमपानेनस्तौत्यथाप्याहद्रविणोदाःऽपिबतुद्राविणोदसइत्ययमेवाग्निर्द्रविणोदाइ
तिशाकपूणिराग्नेयेष्वेवहिसूक्तेषुद्राविणोदसाःप्रवादाभवंति।देवाअग्निंधारयन्द्र

विणोदाइत्यस्यापिनिगमोभवन्तियथोएतत्सबलधनयोर्दातृतमइतिसर्वासुदेवतास्वै
श्वर्यंविद्यतेयथोएतदोजसोजातमुतमन्यएनमितिचाहेत्ययमप्यग्निरोजसाबलेनम
थ्यमानोजायतेतस्मादेनमाहसहसस्पुत्रंसहसःसूनुंसहसोयहुंयथोएतदग्निंद्राविणोदस
माहेत्यृत्विजोत्रद्रविणोदसउच्यंतेहविषोदातारस्तेचैनंजनयंति॥ऋषीणांपुत्रोअधि
राजएषइत्यपिनिगमोभवन्तियथोएतत्तेषांपुनःपात्रस्येंद्रपानमितिभवतीतिभक्तिमात्रं
तद्भवतियथावायव्यानीतिसर्वेषांसोमपात्राणांयथोएतत्सोमपानेनैनंस्तौतीत्यस्मिन्न
प्येतदुपपद्यते॥सोमंपिबमंदसानोगणश्रिभिरित्यस्यापिनिगमोभवन्तियथोएतद्द्रविणो
दाःपिबतुद्राविणोदसइत्यस्यैवतद्भवति॥२॥मेद्यंतुतेवह्नयोयेभिरीयसेरिषण्यन्वी
ळयस्वावनस्पते।आयूयाधृष्णोअभिगूर्यात्वंनेष्ट्रात्सोमंद्रविणोदःपिबऋतुभिः॥मे

घृंतुतेवन्हयोवोढारोयेयेर्थास्मैरिष्यंन्हदीभवायूयधृष्णो अभिगूर्यत्वंनेष्ट्रीयाऽग्छुहम्याऽग्छि
द्म्योऽधिषण्योऽधिषणाभवौऽधिषणावाक्ऽधिषेर्दधात्यर्थे धीसादिनीवाधीसाऽग्निनीऽत्विषा
वनस्पतइत्येनमाहैषहिवनानांपातावापालयितावावनंवनोतेःऽपिबर्तुभिःकालैः॥
३॥ अथात आप्रिय आप्रियः कस्मादाप्नोतेः प्रीणातेर्वाप्रीभिराप्रीणातीतिचब्राह्म
णंतासामिध्मः प्रथमागामीभवतीध्मः समिंधनात्तस्यैषाभवति॥४॥समिद्धो अद्य
मनुषोदुरोणेदेवोदेवान्यजसिजातवेदः॥आचवहमित्रमहश्चिकित्वान्त्वंदूतःकविर
सिप्रचेताः॥समिद्धोऽद्यमनुष्यस्यमनुष्यस्यगृहेदेवोदेवान्यजसिजातवेदआचवहमि
त्रमहश्चिकित्वांश्चेतनावान्त्वंदूतःकविरसिप्रचेताःप्रवृद्धचेतायज्ञेध्मइतिकात्थक्यो
ऽग्निरितिशाकपूणिस्तनूनपादाज्यंभवतिनपादित्यनंतरायाःप्रजायानामधेयंनिर्ण

नि०उ०
१३

ततमाभवतिगोरत्रतनूरुच्यतेतताअस्यांभोगास्तस्याःपयोजायतेपयसआज्यंजायते
ऽग्निरितिशाकपूणिरापोत्रतन्वउच्यंतेतताअंतरिक्षेताभ्यओषधिवनस्पतयोजायंते
ओषधिवनस्पतिभ्यएषजायतेतस्यैषाभवति॥५॥तनूनपात्पथऋतस्ययानान्मध्वा
समंजन्त्स्वदयासुजिह्व॥मन्मानिधीभिरुतयज्ञमृन्धन्देवत्राचकृणुह्यध्वरंनः॥तनूनपा
त्पथऋतस्ययानान्यज्ञस्ययानान्मधुनासमंजन्त्स्वदयकल्याणजिह्वमननानिचनोधी
भिर्यज्ञंचसमर्द्धयदेवान्नोयज्ञंगमयनराशंसोयज्ञइतिकात्थक्योनराअस्मिन्नासीनाः
शंसंत्यग्निरितिशाकपूणिर्नरैःप्रशस्योभवतितस्यैषाभवति॥६॥नराशंसस्यमहि
मानमेषामुपस्तोषामयजतस्ययज्ञैः॥येसुक्रतवःशुचयोधियंधाःस्वदंतिदेवाउभयानि
हव्या॥नराशंसस्यमहिमानमेषामुपस्तुमोयज्ञियस्ययज्ञैर्येसुकर्माणःशुचयोधियं

राम्
१३

धारयितारः स्वदयं तु देवा उभयानि हवींषि सोमं चेतराणि चेति वा तांत्राणि चाप
कानि चेति वैळई हे स्तुतिकर्मणो इंधतेर्वा तस्यैषा भवति ॥७॥ आजुह्वान ईड्यो वंद्यश्चा
याह्यग्ने वसुभिः सजोषाः । त्वं देवानामसि यह्व होता स एनान्यक्षीषितो यजीयान् ॥ आ
हूयमान ईडितव्यो वंदितव्यश्चायाह्यग्ने वसुभिः सहजोषणस्त्वं देवानामसि यह्व होता
यह्व इति महतो नामधेयं यातश्च हूतश्च भवति । स एनान्यक्षीषितो यजीयान् । इषितः
प्रेषित इति वाधीष्ट इति वा यजीयान्यष्टृतरो बर्हिः परिबर्हणात्तस्यैषा भवति ॥८॥ प्रा
चीनं बर्हिः प्रदिशा पृथिव्या वस्तोरस्या वृज्यते अग्रे अह्नां । व्यु प्रथते वितरं वरीयो देवे
भ्यो अदितये स्योनं ॥ प्राचीनं बर्हिः प्रदिशा पृथिव्या वसनायास्याः प्रवृज्यतेऽग्रेऽह्नां ब
र्हिः पूर्वाह्णे तद्वि प्रथते वितरं वितीर्णतरमिति वा वरीयो वरतरमुरुतरं वा देवेभ्यश्चादि

लयेन्वस्योनंस्योनमितिसुखनामस्यतेरवस्यंत्येतत्सेवितव्यंभवतीतिवाद्वारोजवतेर्वा
द्रवतेर्वावारयतेर्वातासामेषाभवति ॥९॥ व्यचस्वतीरुर्वियाविश्रयंतांपतिभ्योनजन
यःशुंभमानाः ॥ देवीर्द्वारोबृहतीर्विश्वमिन्वादेवेभ्योभवतसुप्रायणाः ॥ व्यंचनवत्यउरु
त्वेनविश्रयंतांपतिभ्यइवजायाऊरूमैथुनेधर्मेशुशोभिषमाणावरतममंगमूरूदेव्यो
द्वारोबृहत्योमहत्योविश्वमिन्वाविश्वमाभिरेतियज्ञेगृहद्वारइतिकात्थक्योग्निरितिशा
कपूणिरुषासानक्तोषाश्चनक्ताचोषाव्याख्यातानक्तेतिरात्रिनामानक्तिभूतान्यवश्याये
नापिवानक्ताव्यक्तवर्णातयोरेषाभवति ॥१०॥ आसुष्वयंतीयजतेउपाकेउषासानक्ता
सदतांनियोनौ। दिव्येयोषणेबृहतीसुरुक्मेअधिश्रियंशुक्रपिशंदधाने ॥ सेष्मीयमा
णेइतिवासुष्वापयंत्यावितिवासीदतामितिवान्यासीदतामितिवायज्ञियेउपक्रांतेद

व्येयोषणेबृहत्यौमहत्यौसुरुक्मेसुरोचनेअधिदधानेशुक्रपेशसंश्रियंशुक्रंशोचतेज्व
लितकर्मणिःपेशइतिरूपनाम।पेंशलेर्वेपिशलंभवतिदैव्याहोतारादैव्योहोतारावयं
चाग्निरसौचमध्यमस्तयोरेषाभवति॥११॥दैव्याहोताराप्रथमासुवाचामिमानायज्ञं
मनुषोयजध्यै।प्रचोदयंताविदथेषुकारूप्राचीनंज्योतिःप्रदिशादिशंता।दैव्योहो
तारौप्रथमौसुवाचौनिर्मिमानौयज्ञंमनुष्यस्यमनुष्यस्ययजनायप्रचोदयमानौय
ज्ञेषुकारौपूर्वस्यांदिशीयष्टव्यमितिप्रदिशंतौ।तिस्रोदेवीस्तिस्रोदेव्यस्तामेषाभ सा
वति॥१२॥आनोयज्ञंभारतीतूयमेत्विळामनुष्वदिहचेतयंती।तिस्रोदेवीर्बर्हिरे
दंस्योनंसरस्वतीस्वपसःसदंतु।इळेतुनोयज्ञंभारतीक्षिप्रंभरत आदित्यसुस्यभाइ
डाचमनुष्यवदिहचेतयमानातिस्रोदेव्योबर्हिरिदंसुखंसरस्वतीचसुकर्माणआसी

दंतुत्वष्टातूर्णमश्नुतइतिनैरुक्तास्त्विषेर्वास्याद्दीप्तिकर्मणस्त्वक्षतेर्वास्यात्करोतिकर्मणस्तस्यै
षाभवति॥१३॥यइमेद्यावापृथिवीजनित्रीरूपैरपिंशद्भुवनानिविश्वा॥तमद्यहोतरिषितोय
जीयान्देवंत्वष्टारमिहयक्षिविद्वान्॥यइमेद्यावापृथिव्योजनयित्र्यौरूपैरकरोद्भूतानिचस
र्वाणितमद्यहोतरिषितोयजीयान्देवंत्वष्टारमिहयज्ञविद्वान्माध्यमिकस्त्वष्टेत्याहुर्मध्यमेच
स्थानेसमाम्नातोऽग्निरितिशाकपूणिस्तस्यैषापराभवति॥१४॥आविष्ट्योवर्द्धतेचारुरासुजि
ह्मानामूर्ध्वःस्वयशाउपस्थे।उभेत्वष्टुर्बिभ्यतुर्जायमानात्प्रतीचीसिंहंप्रतिजोषयेते॥आविरा
वेदनात्तस्योवर्द्धतेचारुरासुचारुत्वरतेर्जिह्मंजिहीतेरूर्ध्वउच्छ्रितोभवतिस्वयशाआत्मयशा
उपस्थउपस्थानेउभेत्वष्टुर्बिभ्यतुर्जायमानात्प्रतीचीसिंहंप्रतिजोषयेते॥द्यावापृथिव्याविति
वाऽहोरात्रेइतिवाऽरणीइतिवाप्रत्यक्तेसिंहंसहनंप्रत्यासेवेते॥१५॥वनस्पतिर्व्याख्यातस्तस्यै

षाभवति॥१६॥उपावसृजत्मन्यासमंजंदेवानांपाथऋतुथाहवींषि।वनस्पतिःशमितादेवो
अग्निःस्वदंतुहव्यंमधुनाघृतेन।उपावसृजात्मनात्मानंसमंजन्देवानामन्नमृतावृतौहवींषि
कालेकालेवनस्पतिःशमितादेवोअग्निरित्येतेत्रयःस्वदयंतुहव्यंमधुनाचघृतेनचतत्कोव
नस्पतिर्यूपइतिकात्थक्योग्निरितिशाकपूणिस्तस्यैषापराभवति॥१७॥अंजंतित्वामध्वरे
देवयंतोवनस्पतेमधुनादैव्येन।यदूर्ध्वस्तिष्ठाद्रविणेहधत्ताद्यद्वाक्षयोमातुरस्याउपस्थे॥अंजं
तित्वामध्वरेदेवान्कामयमानावनस्पतेमधुनादैव्येनचघृतेनचयदूर्ध्वःस्थास्यसिद्रविणानिचनो
दास्यसियद्वातेकृतःक्षयोमातुरस्याउपस्थेउपस्थानेग्निरितिशाकपूणिस्तस्यैषापराभवति॥
१८॥देवेभ्योवनस्पतेहवींषिहिरण्यपर्णप्रदिवस्तेअर्थं।प्रदक्षिणिद्रशनयानियूयऋतस्यव
क्षिपथिभीरजिष्ठैः।देवेभ्योवनस्पतेहवींषिहिरण्यपर्णऋतपर्णोपिवोपमार्थेस्याद्धिरण्य

वर्णपर्णीतैअग्निवल्लेअर्थंपुराणस्तेसोर्थोयंतेअक्रमोयज्ञस्यवहपथिभीरजिष्ठैःऋजुतमैरज
स्वल्लतमैस्तअपिष्टनमेरितिवातस्यैषापराभवति॥१९॥वनस्पतेरशनयानियूयपिष्टतमया
वयुनानिविद्वान्।वहदेवत्रादिधिषोहवींषिप्रचदातारममृतेषुवोचः॥वनस्पतेरशनयानि
यूयसुरूपतमयावयुनानिविद्वान्प्रज्ञानानिप्रजानन्वहदेवान्यज्ञेदातुर्हवींषिप्रब्रूहिचदाता
रममृतेषुदेवेषुस्वाहाकृतयः।स्वाहेत्येतत्सुआहेतिवास्वावागाहेतिवास्वंप्राहेतिवास्वाहुतं
हविर्जुहोतीतिवातासामेषाभवति॥२०॥सद्योजातोव्यमिमीतयज्ञमग्निर्देवानामभवत्पु
रोगाः।अस्यहोतुःप्रदिश्यृतस्यवाचिस्वाहाकृतंहविरदन्तुदेवाः।सद्योजायमानोनिरमि
मीतयज्ञमग्निर्देवानामभवत्पुरोगाम्यस्यहोतुःप्रदिश्यृतस्यवाच्यास्येस्वाहाकृतंहविरदन्तुदे
वाइत्ययजंतीतिमाआप्रीदेवताअनुक्रांताअथकिंदेवताःप्रयाजानुयाजाआग्नेयाइत्ये

के॥२१॥प्रयाजान्मे अनुयाजांश्च केवलानूर्जस्वंतंहविषोदत्तभागं॥घृतंचापांपुरुषंचौष
धीनामग्नेश्चदीर्घमायुरस्तुदेवाः॥तवप्रयाजाअनुयाजाश्चकेवलऊर्जस्वंतोहविषःसंतु
भागाः॥तवाग्नेयज्ञो३यमस्तुसर्वस्तुभ्यंनमंतांप्रदिशश्चतस्रः॥आग्नेयावैप्रयाजाआग्नेया
अनुयाजाइतिचब्राह्मणंछंदोदेवताइत्यपरंछंदांसिवैप्रयाजाश्छंदांस्यनुयाजाइतिचब्रा
प्र ह्मणमृतुदेवताइत्यपरमृतवोवैँयाजाऋतवोनुयाजाइतिचब्राह्मणंपशुदेवताइत्यपरंपश
वोवैप्रयाजाःपशवोनुयाजाइतिचब्राह्मणंप्राणदेवताइत्यपरंप्राणावैप्रयाजाःप्राणावाअनुया
जाइतिचब्राह्मणमात्मदेवताइत्यपरमात्मावैप्रयाजाआत्मावाअनुयाजाइतिचब्राह्मणंमाभै
याइतिनुस्छिनभीःकिमात्रमिलरात्किमर्थंपुनरिदमुच्यतेयस्यैदेवतायैहविर्गृहीतंस्यात्तांमनसा
ध्यायेद्वषट्करिष्यन्नितिहविज्ञायतेतान्येतान्येकादशाप्रीसूक्तानितेषांवासिष्ठमात्रेयंवाध्य

नि॰उ॰
१७

श्वंगार्त्समदमितिनाराशंसवंतिमेधातिथंदैर्घतमसंप्रैषिकमित्युभयवंत्यतोन्यानितनून
पात्वंतितनूनपात्वंति ॥२२॥ द्रविणोदाःकस्माद्द्रविणोदाद्रविणसोमेधंतुलेपातआप्रिय४
समिद्धोअद्यतनूनपान्नराशंसस्याजुह्वानःप्राचीनंव्यचस्वतीरासुष्वयंतीदैव्याहोतारानो
यज्ञंयइमेआविष्ट्योवनस्पतिरुपावसृजांजंतिदेवेभ्योवनस्पतेवनस्पतेरशनयासद्योजा
तःप्रयाजान्मेद्वाविंशतिः॥ ॥इतिनैरुक्तेद्वितीयोध्यायः॥ ॥ॐ अथयानिपृथिव्याय
तनानिसत्वानिस्तुतिंलभंतेतान्यतोनुक्रमिष्यामस्तेषामश्वःप्रथमागामीभवत्यश्वोव्याख्या
तस्तस्यैषाभवति॥१॥ अश्वोवोळ्हासुखंरथंहसनामुपमंत्रिणः॥शेपोरोमण्वंतौभेदौवा
रिन्मंडूकइच्छंतींद्रायेंदोपरिस्रव॥अश्वोवोळ्हासुखंवोळ्हारथंवोळ्हासुखरथमितिकल्या
णनामकल्याणंपुण्यंसुहितंभवतिसुहितंगम्यतीतिवाहसेवाचापातावापालयितावाशेप

राम्
१७

मृच्छतीति वाऽश्विवारस्यऽत्तिमानो व्याख्यातस्तस्यैषा भवति ॥२॥ मा नोऽमित्रो वरुणो अर्यमायुरिं
द्र ऋभुक्षा मरुतः परिख्यन् । यद्वाऽजिनो देवजातस्य सप्तेः प्रवक्ष्यामोऽविदथे वीर्याणि ॥ यद्वा
ऽजिनो देवैजातस्य सप्तेः सरणस्य प्रवक्ष्यामो यज्ञे विदथे वीर्याणि मा नस्त्वं मित्रश्च वरुणश्चा
र्यमा चायुश्च वायुरयन इंद्र ऋभुक्षा ऋभूणां राजेति वा मरुतश्च परिख्यन् शकुनिः श
क्नोत्युन्नेतुमात्मानं शक्नोतीति नदितुमिति वा शक्नोति तकितुमिति वा सर्वतः शंकरोऽस्त्विति
वा शक्नोतेर्वा तस्यैषा भवति ॥३॥ कनिक्रदज्जनुषं प्रब्रुवाण इयर्ति वाचमरितेव नावं । सु
मंगलश्च शकुने भवाऽसि मा त्वा काचिदभिभा विश्व्या विदत् ॥ न्यक्रंदीज्जन्म प्रब्रुवाणो यथा
स्य शब्दस्तथा नामेरयतीति वाचमीरयितेव नावं सुमंगलश्च शकुने भव कल्याणमंगलो मंगलं
गिरतेर्गृणात्यर्थे गिरत्यनर्थानिति वाऽगलमंगवन्मज्जयति पापकमिति नैरुक्ता मागच्छ

नि॰उ॰
१८

त्विति वा माच त्वा काश्चिदभिभूतिः सर्वतो विदङ्गृत्समदमर्थमभ्युत्थितं कपिंजलोऽभिवाशीत
दभिवादिन्येषर्ग्भवति ॥४॥ भद्रंवद दक्षिणतो भद्रमुत्तरतो वद । भद्रं पुरस्तान्नो वद भद्रं
पश्चात्कपिंजल । इति सा निगदव्याख्याता गृत्समदो गृत्समदनो गृत्स इति मेधाविनामगृ
णातेः स्तुतिकर्मणो मंडूका मज्जूका मज्जनान्मदतेर्वा मोदतिकर्मणो मंदतेर्वा तृप्तिकर्मणो
मंडयतेरिति वैयाकरणा मंड एषामोक इति वा मंडो मदेर्वा मुदेर्वा तेषामेषा भवति ॥५॥ सं
वत्सरं शशयाना ब्राह्मणा व्रतचारिणः । वाचं पर्जन्यजिन्वितां प्र मंडूका अवादिषुः ॥ सं
वत्सरं शिश्याणा ब्राह्मणा व्रतचारिणोऽब्रुवाणा अप्यवोपमार्थे स्याद्ब्राह्मणा इव व्रतचारि
ण इति वा वाचं पर्जन्यप्रीतां प्रावादिषुर्मंडूका वसिष्ठो वर्षकामः पर्जन्यं तुष्टाव तं मंडूका अन्व
मोदंत स मंडूकाननुमोदमानान्दृष्ट्वा तुष्टाव तदभिवादिन्येषर्ग्भवति ॥६॥ उपप्लवेत मंडूकि

राम
१८

वर्षमावलदादुरिः॥मध्येहृदयप्लुवस्यविग्रत्यचतुरःपदः॥इतिसाऽनिगदव्याख्याताऽक्षा
अस्नुवतएनाऽनितिवाऽभ्यस्नुवतएभिरितिवातेषामेषाभवन्ति॥७॥प्रावेपामाबृहतोमा
दयंतिप्रवातेजाइरिणेवर्वृतानाः॥सोमस्येवमौजवतस्यभक्षोऽविभीदकोजागृविर्मह्यम
छान्॥प्रवेपिणोमामहतोऽविभीदकस्यफलानिमादयंतिप्रवातेजाःप्रवणेजाइरिणेवर्त
मानाइरिणंऽनिर्ऋणंऽमृणातेरपार्णंभवत्यपरताअस्मादोषधयइतिवा॥सोमस्येवमौज
वतस्यभक्षः॥मौजवतोमूजवतिजातोमूजवान्पर्वतोमुंजवान्मुंजोऽविमुच्यतइषीकयेषी
केषतेर्गतिकर्मणइयमपीतरेषीकैतस्मादेवऽविभीदकोऽविभेदनाज्जागृविर्जागरणान्मह्य
मचच्छदत्प्रशंसत्येनान्प्रथमयानिंदत्युत्तराभिर्ऋषेरक्षपरिधूनस्यैतदार्षंवेदयंतेग्रावाणो
हंतेर्वागृणातेर्वागृह्णातेर्वातेषामेषाभवन्ति॥८॥प्रैतेवदंतुप्रवयंवदामग्रावभ्योवाचंवद

तावदस्यः । यदद्रयः पर्वताः साकमाशवः श्लोकंघोषंभरथेंद्रायसोमिनेः ॥ प्रवदंत्वेतेप्रवदा
मवयंग्रावभ्योवाचंवदनवदद्भ्योयदद्रयः पर्वताः अदरणीयाः सहसोममाशवः क्षिप्रकारि
णः श्लोकः शृणोतेर्घोषोघुष्यतेः सोमिनोयूयंस्थेतिवासोमिनोगृहेष्वितिवाहेननराः प्रवा
स्यंतेसनाराशंसोमंत्रस्तस्यैषाभवति ॥९॥ अमंदान्त्स्तोमान्प्रभरेमनीषासिंधावधिक्षि
यतोभाव्यस्यायोमेसहस्रममिमीतसवानतूर्तोराजाश्रवइच्छमानः । अमंदान्त्स्तोमान
बालिशाननल्पान्वाबालोबलवतीभर्त्तव्योभवत्यंबास्मा अलंभवतीतिवाबास्मैबलंभव
तीतिवाबलोवाप्रतिषेधव्यवहितः प्रभरेमनीषयामनसईषयास्तुत्याप्रज्ञयावासिंधा
वधिनिवसतोभावयव्यस्यराज्ञोयोमेसहस्रंनिरमिमीतसवानतूर्तोराजातूर्णइतिवात्व
रमाणइतिवाप्रशंसामिच्छमानः ॥१०॥ यज्ञसंयोगाद्राजास्तुतिंलभेतराजसंयोगायुद्धो

पकरणानितेषांरथःप्रथमागामीभवतिरथोरंहतेर्गतिकर्मणःस्थिरतेर्वास्याद्विपरीतस्य
रममाणोस्मिंस्तिष्ठतीतिवारपतेर्वारसतेर्वातस्यैषाभवति॥११॥वनस्पतेवीड्वंगोहिभूया
अस्मत्सखाप्रतरणःसुवीरः।गोभिःसंनद्धोअसिवीळयस्वास्थातातेजयतुजेत्वानि।वनं
स्पतेदृढांगोहिभवास्मत्सखाप्रतरणःसुवीरःकल्याणवीरोगोभिसंनद्धोअसिवीळयस्वे
तिसंस्तंभस्वास्थातातेजयतुजेतव्यानिदुंदुभिरितिशब्दानुकरणंद्रुमोभिन्नइतिवादुंदु
भ्यतेर्वास्याच्छब्दकर्मणस्तस्यैषाभवति॥१२॥उपश्वासयपृथिवीमुतद्यांपुरुत्रातेमनुतां।
विष्ठितंजगत्।सदुंदुभेसजूरिंद्रेणदेवैर्दूराद्दवीयोअपसेधशत्रून्।उपश्वासयपृथिवींच
दिवंचबहुधाघोषंमन्यतांविष्ठितंस्थावरंजंगमंचयत्सदुंदुभेसहजोषणइंद्रेणचदेवैश्चदू
राद्दूरतरमपसेधशत्रून्निषुधिरिषूणांनिधानंतस्यैषाभवति॥१३॥बह्वीनांपिताबहुरस्यपु

ऽश्चिश्चाकृणोतिसमनावगत्य ॥ इषुधिः संकाः पृतनाश्चसर्वाः पृष्ठेनिनद्धोजयतिप्रसूतः।
बहूनांपिताबहुरस्यपुत्रइतीषूनभिप्रेत्यप्रस्मयतइवापाव्रियमाणः शब्दानुकरणंवासंकाः
सचतेः संपूर्वाद्वाकिरतेः पृष्ठेनिनद्धोजयतिप्रसूतइतिव्याख्यातंहस्तघ्नोहस्तेहन्यतेतस्यै
षाभवति ॥१४॥ अहिरिवभोगैः पर्येतिबाहुंज्यायाहेतिंपरिबाधमानः ॥ हस्तघ्नोविश्वावयु
नानिविद्वान्पुमान्पुमांसंपरिपातुविश्वतः ॥ अहिरिवभोगैः परिवेष्टयतिबाहुंज्यायावधा
त्परित्रायमाणोहस्तघ्नः सर्वाणिप्रज्ञानानिप्रजानन्पुमानुरुमनाभवतिपुंसतेर्वभीशवो
व्याख्यातास्तेषामेषाभवति ॥१५॥ रथेतिष्ठन्नयतिवाजिनः पुरोयत्रयत्रकामयतेसुषार
थिः ॥ अभीशूनांमहिमानंपनायतमनः पश्चादनुयच्छंतिरश्मयः ॥ रथेतिष्ठन्नयतिवा
जिनः पुरस्तात्सन्नीयत्रयत्रकामयतेसुषारथिः कल्याणसारथिरभीशूनांमहिमानंपू

जयाभिमनः पश्चात्संततोनुयछंतिरउभयोधनुर्धन्वतेर्गतिकर्मणोवधकर्मणोवाधन्वंत्स
स्मादिषवस्तस्यैषाभवति॥१६॥धन्वनागाः धन्वनाजिंजयेमधन्वनातीव्राःसमदोजयेम
॥धनुःशत्रोरपकामंकृणोतिधन्वनासर्वाःप्रदिशोजयेम॥इतिसानिगदव्याख्यातास
मदःसमदोवात्तेःसमंदोवामदतेर्ज्याजयतेर्वाजिनातेर्वाप्रजावयतीषूनितिवातस्याए
षाभवति॥१७॥वक्ष्यंतीवेदागनीगंतिकर्णंप्रियंसखायंपरिषस्वजाना।योषेवशिङ्क्ते
विततधिधन्वन्ज्याइयंसमनेपारयंती॥वक्ष्यंतीवागच्छतिकर्णंप्रियमिवसखायमिषुं
परिष्वजमानायोषेवशिङ्क्तेःशब्दंकरोतिविततधिधनुषिज्येयंसमनेसंग्रामेपारयंतीपा
रंनयंतीइषुरीषतेर्गतिकर्मणोवधकर्मणोवातस्यैषाभवति॥१८॥सुपर्णंवस्तेमृगोअस्या
दंतोगोभिःसंनद्धापततिप्रसूता॥यत्रानरःसंचविचद्रवंतितत्रास्मभ्यमिषवःशर्मयंस

नृगसुपर्णंवस्तइतिवाजानन्नभिप्रेत्यमृगमयोस्यादंतोमृगयतेर्वागोभिःसंनद्धापततिप्रसू
तेतिव्याख्यातंयत्रनराःसंद्रवंतिचविद्रवंतिचतत्रास्मभ्यमिषवःशर्मयच्छंतुशरणंसंग्रा
मेष्वश्वाजनींकशेत्याहुःकशाप्रकाशयतिभयमश्वायकृष्यतेर्वाणूभावाद्वाक्पुनःप्रका
शयत्यर्थान्खशयाक्रोशतेर्वाश्वकशायाएषाभवति॥१९॥आजंघंतिसान्वेषांजघनां
उपजघ्नते॥अश्वाजनिप्रचेतसोश्वान्त्समत्सुचोदय॥आघ्नतिसानून्येषांसरणानिस
क्थीनिसक्थिसचतेरासक्तोस्मिन्कायोजघनानिचोपघ्नतिजघनंजंघन्यतेरश्वाजनि
प्रचेतसःप्रवृद्धचेतसोश्वान्त्समत्सुसमरणेषुसंग्रामेषुचोदयोलूखलमुरुकरंवौकरंवो
र्ध्वखंवोरुमेकुर्वित्यब्रवीत्तदुलूखलमभवदुरुकरंवैतदुलूखलमित्याचक्षतेपरोक्षेणे
लिचब्रालयंतस्यैषाभवति॥२०॥यच्चिद्धित्वंगृहेगृहउलूखलकयुज्यसे॥इहद्युमत्त

मंवदजयताऽमिवदुंदुभिः॥इतिसाऽनिगदव्याख्याता॥२१॥वृषभःप्रजांवर्षतीतिवाऽ
तिवृहतिरेतइतिवातद्वृषकर्मावर्षणाद्वृषभस्तस्यैषाभवति॥२२॥न्यक्रंदयन्नुपयंतएन
ममेहयन्वृषभंमध्यआजेः॥तेनसूभर्वंशतवत्सहस्रंगवांमुद्गलःप्रधनेजिगाय॥न्य
क्रंदयंन्नुपयंतएनमितिव्याख्यातममेहयन्वृषभंमध्यआजेराजयनस्याजवनस्येति
वातेनतंसूभर्वंराजानंभर्वतिरत्तिकर्मातद्वासूभर्वंसहस्रंगवांमुद्गलःप्रधनेजिगायप्र
धनइतिसंग्रामनामप्रकीर्णान्यस्मिन्धनानिभवंतिद्रुघणोद्रुममयोघनस्तत्रेतिहासमा
चक्षतेमुद्गलोभार्म्यश्विऋषिर्वृषभंचद्रुघणंचयुक्त्वासंग्रामेव्यवहृत्याजिंजिगायतदभि
वादिन्येषर्ग्भवति॥२३॥इमंतंपश्यवृषभस्ययुंजंकाष्ठायामध्येद्रुघणंशयानं।येनजि
गायशतवत्सहस्रंगवांमुद्गलःपृतनाज्येषुइमंतंपश्यवृषभस्यसहयुजंकाष्ठायामध्ये

द्रुघणंशयानंयेनजिगायशतवत्सहस्रंगवांमुद्गलः पृतनाज्येषुपृतनाज्यमितिसंग्रामनामपृत
नानामजँनाद्वामुद्गलोमुद्गलवान्मुद्गगिलोवामदनंगिलतीतिवामदंगिलोवामुदंगिलोवाभा
र्म्यश्वोभृम्यश्वस्यपुत्रोभृम्यश्वोभृमयोस्याश्वाअश्वभरणाद्वापितुरित्यन्ननामपातेर्वापिबते
र्वाप्यायतेर्वातस्यैषाभवति।।२४।।पितुंनुस्तोषंमहोधर्माणंतविषीं।यस्यत्रितोव्योजसावृत्रं
विपर्वमर्दयत्।।तंपितुंस्तौमिमहतोधारयितारंबलस्यतविषीतिबलनामतवतेर्वऋद्धिकर्म
णोयस्यत्रितओजसाबलेनत्रितस्त्रिस्थानइन्द्रोवृत्रंविपर्वाणंव्यर्दयत्नद्योव्याख्यातास्ता
सामेषाभवति।।२५।।इमंमेगंगेयमुनेसरस्वतिशुतुद्रिस्तोमंसचतापरुष्ण्या।असिक्न्या
मरुद्वृधेवितस्तयार्जीकीयेशृणुह्यासुषोमया।।इमंमेगंगेयमुनेसरस्वतिशुतुद्रिपरुष्णि
स्तोममासेवध्वमसिक्न्याचसहमरुद्वृधेवितस्तयाचार्जीकीयआशृणुहिसुषोमयाचेति

समस्तार्थोथैकपदनिरुक्तंगंगागमनाद्यमुनाप्रयुवतीगछतीतिवाप्रवियुतंगछतीतिवासरस्वतीसरइत्युदकनामसर्तेस्तद्वतीशुतुद्रीशुद्राविणीक्षिप्रद्राविण्याशुतुन्नेवद्रवतीतिवैरावतींपरुष्णींत्याहुःपर्ववतीभास्वतीकुटिलगामिन्यसिक्न्यशुक्लासितासितमितिवर्णनामतत्प्रतिषेधोऽसितंमरुद्वृधाःसर्वानद्योमरुतएनावर्द्धयंतिवितस्ताविदग्धाविवृद्धामहाकूलाआर्जीकीयांविपाळित्याहुर्ऋजूकप्रभवावाऋजुगामिनीवाविपाड्विपाटनाद्वाविपाशनाद्वाविप्रापणाद्वापाशाअस्यांव्यपाश्यंतवसिष्ठस्यमुमूर्षतस्तस्माद्विपाळुच्यतेपूर्वमासीदुरुंजिरासुषोमासिंधुर्यदेनामभिप्रसुवंतिनद्यःसिंधुःस्यंदनादापआप्नोतेस्तासामेषाभवति॥२६॥आपोहिष्ठामयोभुवस्तानऊर्जेदधातन॥महेरणायचक्षसे॥आपोहिस्थसुखभुवस्तानोन्नायधत्तमहतेचनोरणायरमणीयायचदर्शनायओषधयओषद्ध

यंतीऽति वौषत्येनाधयंतीऽति वा दोषंधयंतीऽति वा तासामेषा भवति॥२७॥ या ओषधीः पूर्वा जा
ता देवेभ्यस्त्रियुगं पुरा। मनै नु बभ्रूणामहं बभ्रुवर्णानां हरणानां भरणानाऽमिति वा शतं धामाऽनि
सप्त चेऽति धामाऽनि त्रयाऽणि भवंऽति स्थानाऽनि नामाऽनि जन्मानीऽति जन्मान्यत्राऽभिप्रेताऽनि सप्त
शतं पुरुषस्य मर्माणि तेष्वेनादधतीऽति वा रात्रिर्व्याख्याता तस्या एषा भवति॥२८॥ आ रात्रि
पार्थिवं रजः पितरः प्रायु धामऽभिः॥ दिवः सदांऽसि बृहतीऽविऽतिष्ठस आ त्वेषं वर्त्तते तमः॥
आपूपुरस्त्वं रात्रि पार्थिवं रजः स्थानैर्मध्यमस्य दिवः सदांऽसि बृहती महतीऽविऽतिष्ठस आ
वर्त्तते त्वेषं तमो रजोऽरण्यान्यरण्यस्य पत्न्यरण्यमपार्णं ग्रामादरमणं भवतीऽति वा तस्या ए
षा भवति॥२९॥ अरण्यान्यरण्यान्यसौ या प्रेव नश्यऽसि। कथा ग्रामं न पृच्छऽसि न त्वा भीऽरिव
विंदती३ँ॥ अरण्यानीत्येनामामंत्रयते यासावरण्याऽनि वनाऽनि पराचीव न[illegible]यऽसि कथं ग्रामं

नघृच्छसिनत्वाभीर्गिर्वदंतीवेतीवः परिभयार्पैवीश्रद्धाश्रद्धानात्तस्याएषाभवति ॥ २० ॥ श्र
द्धयाग्निः समिध्यतेश्रद्धयाहूयतेहविः ॥ श्रद्धांभगस्यमूर्द्धनिवचसावेदयामसि ॥ श्रद्धया
ग्निः साधुसमिध्यतेश्रद्धयाहविः साधुहूयतेश्रद्धांभगस्यभागधेयस्यमूर्धनिप्रधानां
गेवचनेनावेदयामः पृथिवीव्याख्याता तस्याएषाभवति ॥ २१ ॥ स्योनापृथिविभवानृक्षरा
निवेशनी ॥ यच्छानः शर्मसप्रथः ॥ सुखानः पृथिविभवाऽनृक्षरानिवेशन्यृक्षरः कंटकऋ
च्छतेः कंटकः कंतपोवाकृंततेवाकिंटतेर्वास्याद्गतिकर्मणउद्गततमोभवतियच्छनः शर्मय
छंतुशरणंसर्वतः पृथ्वप्वाआख्याता तस्याएषाभवति ॥ २२ ॥ अमीषांचित्तंप्रतिलोभयंती
गृहाणांगान्यप्वेपरेहि ॥ अभिप्रेहिनिर्दहहृत्सुशोकैरंधेनामित्रास्तमसासचंतां ॥ अमीषां
चित्तानिप्रज्ञानानिप्रतिलोभयमाना गृहाणांगान्यप्वेपरेह्यभिप्रेहिनिर्दहैषांहृदयानिशो

कैरंयेनामित्रास्तमसासंसेव्यंतामग्नाय्यग्नेःपत्नीतस्याएषाभवति॥२३॥इहेंद्राणीमुपह्व
येवरुणानींस्वस्तये।अग्नायींसोमपीतये॥इतिसानिगदव्याख्याता॥२४॥अथातोद्वंद्
द्वान्युलूखलमुसलेउलूखलंव्याख्यातंमुसलंमुहुःसरंतयोरेषाभवति॥३५॥आयजी
वाजसातमाताह्यु१च्चाविजर्भृतः॥हरीइवांधांसिबप्सता॥आयष्टव्येअन्नानांसंभक्तन
मेतेह्युच्चैर्विभ्रियेतेहरीइवान्नान्यभिभुंजानेहविर्धानेहविषांनिधानेतयोरेषाभवति॥३६
आवामुपस्थमद्रुहादेवाःसीदंतुयज्ञियाः॥इहाद्यसोमपीतये॥आसीदंतुवामुपस्थमुप
स्थानमद्रोग्धव्येइतिवायज्ञियादेवायज्ञसंपादिनइहाद्यसोमपानायद्यावापृथिव्यौव्या
ख्यातेतयोरेषाभवति॥३७॥द्यावानःपृथिवीइमंसिध्रमद्यदिविस्पृशं॥यज्ञंदेवेषुयच्छ
तां॥द्यावापृथिव्यौनइमंसाधनमद्यदिविस्पृशंयज्ञंदेवेषुनियच्छतां।विपाट्छुतुद्र्यौव्या

ख्यातेतयोरेषाभवति॥३८॥प्रपर्वतानामुशतीउपस्थादश्वेइवविषितेहासमाने।गा
वेवशुभ्रेमातरारिहाणेविपाट्छुतुद्रीपयसाजवेते॥पर्वतानामुपस्थानादुशत्यौकामय
मानेअश्वेइवविमुक्तेइतिवाविषणेइतिवाहासमानेहासतिःस्पर्द्धायांहर्षमाणेवागावा
विवशुभ्रेशोभनेमातरौसंरिहाणेविपाट्छुतुद्र्यौपयसाप्रजवेतेआर्त्नीअर्तन्यौवार
त्स्यौवारिषण्यौवातयोरेषाभवति॥३९॥तेआचरंतीसमनेवयोषामातेवपुत्रंबिभृतामुप
स्थे।अपशत्रून्विध्यतांसंविदानेआर्त्नीइमेविस्फुरंतीअमित्रान्।तेआचरंत्यौसमनसा
विवयोषेमातेवपुत्रंबिभृतामुपस्थेउपस्थानेपविध्यतांशत्रून्संविदानेआर्त्न्यौइमेवि
घ्नत्यावमित्रान्छुनासीरौशुनोवायुःशुएत्यंतरिक्षेसीरआदित्यःसरणात्तयोरेषाभवति
॥४०॥शुनासीराविमांवाचंजुषेथांयद्दिविचक्रथुःपयः।तेनेमामुपसिंचतं॥इतिसाग्नि

नि०उ०
२५

गदव्याख्यातादेवीजोष्ट्रीदेव्यौजोषऽयित्र्यौद्यावापृथिव्याऽवितिवाऽहोरात्रेइऽतिवासस्यंच
समाचेऽतिकात्थक्यस्तयोरेषसंप्रैषोभवति ॥४२॥ देवीजोष्ट्रीवसुधितीययोरन्याघाद्वे
षांऽसियुयवदान्यावक्षद्वसुवार्याणियजमानायवसुवनेवसुधेयस्यवीतांयज ॥ देवीजो
ष्ट्रीदेव्यौजोषऽयित्र्यौवसुधितीवसुधान्यौययोरन्याघाऽनिद्वेषांसियावयत्यावहत्यन्याव
सूऽनिवरणीयाऽनियजमानायवसुवननायचवसुधानायचवीतांऽपिबेतांकामयेतांवाजये
तिसंप्रैषोदेवीऊर्जाहुतीदेव्याऊर्जाह्वान्यौद्यावापृथिव्याऽवितिवाहोरात्रेइऽतिवासस्यंच
समाचेऽतिकात्थक्यस्तयोरेषसंप्रैषोभवति ॥४३॥ देवीऊर्जाहुतीइषमूर्जमन्यावक्षत्स
ग्धिंसपीऽतिमन्यान्नवेनपूर्वंदयमानास्यामपुराणेननवंतामूर्जमूर्जाहुतीऊर्जयमानेऽ
धत्तांवसुवनेवसुधेयस्यवीतांयज ॥ देवीऊर्जाहुतीदेव्याऊर्जाह्वान्यावन्नंचरसंचावह

राम
२५

त्वावहत्स्वन्यासहजग्धिंचसहपीतिंचान्यानवेनपूर्वंदयमानास्यामपुराणेननवंतामू
र्जमूर्जाहुतीऊर्जयमानेअधात्तांवसुवननायवसुधानायचवीत्तांऽपबेतांकामयेतांवा
वायजेतिसंप्रैषोयजेतिसंप्रैषः ॥४३॥ अथयान्यवोवोळ्हामानोऽभित्रः कनिक्रदद्भद्रं
वद्संवत्सरमुपप्लुवतप्रावेपाःप्रेतेवदंत्वमंदान्प्रज्ञसंयोगाद्धनस्पतउपश्वासयवृक्षीना
मऽहिरिवभोगैरथेतिष्ठंधन्वनागावक्ष्यंतीवसुपर्णंवस्तेआजंघंतिय[illegible]ऽछित्वंवृषभोन्य
क्रंदयन्निमंतऽप्लुग्निमंमआपोऽहियांओषधीरारान्य[illegible]याऽग्नेश्रद्धयास्योनाभीषाऽमिहें
द्राणीमथातोष्टावायजीआवामुपस्थंघावानःप्रपर्वतानांतेआचरंतीशुनासीरौदेवी
जोष्ट्रीदेवीऊर्जाहुतीऽश्चत्वारिंशत् ॥ ॥इतिनैरुक्तेउत्तरषट्केतृतीयोध्यायः॥ ॥ॐ
अथातोमध्यस्थानादेवतास्तासांवायुःप्रथमागामीभवतिवायुर्वातेर्वेतेर्वास्याद्गतिक

र्मणएतेरितिस्थौलाष्ठीविरनर्थकोवकारस्तस्यैषाभवति॥१॥वायवायाहिदर्शतेमेसोमा
अरंकृता:॥तेषांपाहिश्रुधीहवं॥वायवायाहिदर्शनीयेमेसोमाअरंकृताअलंकृतास्तेषां
पिबशृणुनोह्वानमितिकमन्यंमध्यमादेवमवक्ष्यत्तस्यैषापराभवति॥२॥आसस्राणास:
शवसानमच्छेंद्रंसुचक्रेरथ्यासोअश्वा:॥अभिश्रवऋज्यंतोवहेयुर्नूचिन्नुवायोरमृतंविद
स्येत्॥आससृवांसोभिबलायमानमिंद्रंकल्याणचक्रेरथेयोगायरथ्याअश्वारथस्यवोढार
ऋज्यंतऋजुगामिनोन्नमभिवहेयुर्नवंचपुराणंचश्रवइत्यन्ननामश्रूयतइतिसतोवायो
श्चास्यभक्षोयथानविदस्येदितींद्रप्रधानेत्येकेनैघंटुकंवायुकर्मोभयप्रधानेत्यपरंवरुणो
वृणोतीतिसततस्यैषाभवति॥३॥नीचीनबारंवरुण:कबंधंप्रससर्जरोदसीअंतरिक्षं
तेनविश्वस्यभुवनस्यराजायवंनवृष्टिर्व्युनत्तिभूम॥नीचीनद्वारंवरुण:कबंधंमेघंक

वनमुदकंभवतितदस्मिन्धीयतउदकमपिकवंधमुच्यतेबंधिरनिभृतत्वेकमनिभृतं
चप्रसजतिद्यावापृथिव्योश्चांतरिक्षंचमहत्वेनतेनसर्वस्यभुवनस्यराजायवमिववृष्टि
र्व्युनत्तिभूमिंतस्यैषापराभवति॥४॥तमूषुसमनागिरापितृणांचमन्मभिः॥नाभाक
स्यप्रशस्तिभिर्यःसिंधुनामुपोदयेसप्तस्वसासमध्यमोनभंतामन्यकेसमे॥तंस्वभिष्टौ
मिसमानयागिरागीत्यास्तुत्यापितृणांचमननीयैःस्तोमैर्नाभाकस्यप्रशस्तिभिर्ऋषि
र्नाभाकोबभूवयःस्यंदमानानामासामपामुपोदयेसप्तस्वसारमेनमाहवाग्निःसमध्यम
इतिनिरुच्यतेथैषएवभवतिनभंतामन्यकेसमे॥माभूवन्नन्यकेसर्वेयेनोद्विषंतिदुर्धियः
पापधियःपापसंकल्पारुद्रोरौतीतिसतोरोरूयमाणोद्रवतीतिवारोदयतेर्वायदरुदत्तद्रु
द्रस्यरुद्रत्वमितिकाठकंयदरोदीत्तद्रुद्रस्यरुद्रत्वमितिहारिद्रविकंतस्यैषाभवति॥५॥

नि०उ०
२७

इमारुद्रायस्थिरधन्वनेगिरःक्षिप्रेषवेदेवायस्वधान्वे।अषाळ्हायसहमानायवेधसे
तिग्मायुधायभरताशृणोतुनः।।इमारुद्रायदृढधन्वनेगिरःक्षिप्रेषवेदेवायाभवतेऽषा
ढायान्यैःसहमानायविधात्रेतिग्मायुधायभरतशृणोतुनस्तिग्मंतेजतेरुत्साहकर्मणआ
युधमायोधनात्तस्यैषापराभवति।।८।।यातेदिद्युदवसृष्टादिवस्परिक्ष्मयाचरतिपरिसा
वृणक्तुनः।सहस्रंतेस्वपिवातभेषजामानस्तोकेषुतनयेषुरीरिषः।।यातेदिद्युदवसृष्टा
दिवस्परिदिवोधिदिद्युद्द्यतेर्वाद्युतेर्वाद्योततेर्वाक्ष्मयाचरतिक्ष्मापृथिवीतस्यांचरतितया
चरतिविक्ष्मापयंतीचरतीतिवापरिवृणक्तुनःसासहस्रंतेस्वाप्तवचनभैषज्यानिमानस्त्वं
पुत्रेषुचपौत्रेषुचरीरिषस्तोकंतुद्यतेस्तनयंतनोतेरग्निरपिरुद्रउच्यतेतस्यैषाभवति।।
७।।जराबोधतद्विविड्ढिविशेविशेयज्ञियाय।स्तोमंरुद्रायदृशीकं।।जरास्तुतिर्जरतेस्तु

राम
२७

तिकर्मणस्तांबोधतयाबोधऽयितऽरितिवातद्विऽविहितत्कुरुमनुष्यस्यमनुष्यस्यपजना
यस्तोमंरुद्रामदर्शनीयऽमिंद्रइरांहणातीऽतिवैरांहदातीऽतिवैरांदधातीऽतिवैरांदारयतइ
तिवैरांधारयतइऽतिवैंदवेद्रवतीऽतिवैंदोरमतइऽतिवैंधेभूतानीऽतिबालषदेनंशोणेःसेमेंधं
स्तादिंद्रस्येंद्रत्वमिऽतिविज्ञायतइदंकरणाऽदित्याग्रायणइदंदर्शनाऽदित्यौपमन्यवइंदतेर्वै
श्वर्यकर्मणइंछत्रूणांदारयितावाद्रावयितावादरऽयिताचयज्वनांतस्येषाभवति॥८॥
अरर्दरुत्समसृजोऽविखाऽनित्वमर्णवान्बद्धधाऽनांअरम्णाः॥महांतऽमिंद्रपर्वतंऽवियद्व४
सृजोऽविधाराअवदानवंहन्।अहृणाउत्समुत्सउत्सरणाद्वोत्सदनाद्वोत्स्यंदनाद्वोनत्ते
वव्यसृजोस्यखाऽनित्वमर्णवानर्णस्वतऽतान्माध्यऽमिकान्तंस्त्यायान्बाबध्यमानानरम्णा
रम्णाऽतिःसंयमनकर्माऽविसर्जनकर्मावामहांतऽमिंद्रपर्वतंमेघंयद्व्यहृणोर्व्यसृजोस्यधा

रा।अवंहन्नेनंदानवंदानकर्माणंतस्यैषापराभवति॥१॥योजातएवप्रथमोमनस्वान्देवो
देवान्क्रतुनापर्यभूषत्॥यस्यशुष्माद्रोदसी अभ्यसेतानृम्णस्यमन्हासजनासइंद्रः॥
योजायमानएवप्रथमोमनस्वीदेवोदेवान्क्रतुनाकर्मणापर्यभवत्पर्यगृण्हात्पर्यरक्षद
त्यक्रामदितिवायस्यबलाद्यावापृथिव्यावप्यबिभीतांनृम्णस्यमन्हाबलस्यमहत्वेनस
जनासइंद्रइत्यृषेर्दृष्टार्थस्यप्रीतिर्भवत्याख्यानसंयुक्तापर्जन्यस्तृपेराद्यंतविपरीतस्य
तर्पयिताजन्यः परोजेतावाजनयितावाप्रार्जयितावारसानांतस्यैषाभवति॥१०॥विवृ
क्षान्हंत्युतहंतिरक्षसोविश्वंबिभायभुवनंमहावधात्॥उतानागाईषतेवृष्ण्यावतोयत्प
र्जन्यस्तनयन्हंतिदुष्कृतः॥विहंतिवृक्षान्विहंतिचरक्षांसिसर्वाणिचास्माद्भूतानिबिभ्य
तिमहान्महान्त्यस्यवधोप्यनपराधोनीतः पलायतेवर्षकर्मवतोयत्पर्जन्यस्तनयन्हंति

दुष्कृतः पापकृतो बृहस्पतिर्बृहतः पाता वा पालयिता वा तस्यैषा भवति॥११॥अश्नापिन
द्धं मधु पर्यपश्यंन्मत्स्यं न दीन उदनि क्षियंतं॥निष्टज्जभार चमसं न वृक्षाद्बृहस्पतिर्विरवे
णा विकृत्य॥अश्नानवतामेघेनापिनद्धं मधु पर्यपश्यन्मत्स्यमिव दीन उदके निवसंतं नि
र्जहार तच्चमसमिव वृक्षाच्चमसः कस्माच्चमंत्यस्मिन्निति बृहस्पतिर्विरवेण शब्देन
विकृत्य ब्रह्मणस्पतिर्ब्रह्मणः पाता वा पालयिता वा तस्यैषा भवति॥१२॥अश्मास्यमव
तं ब्रह्मणस्पतिर्मधुधारमभि यमोजसातृणत्॥तमेव विश्वे पपिरे स्वर्दृशो बहु साकं सिसि
चुरुत्समुद्रिणं॥अश्मानवंतमास्यंदनवंतमवातितं ब्रह्मणस्पतिर्मधुधारमभि यमोज
साबलेनाभ्यतृणत्तमेव सर्वे पिबंति रश्मयः सूर्यदृशो बहुकेनं सह सिंचंत्युत्समुद्रिणमुद
कवंतं॥१३॥क्षेत्रस्य पतिः क्षेत्रं क्षियतेर्निवासकर्मणस्तस्य पाता वा पालयिता वा तस्यै

षाभवति॥२४॥क्षेत्रस्यपतिनावयंहितेनेवजयामसि॥गामश्वंपोषयित्न्वासनोमृळाती
दृशे॥क्षेत्रस्यपतिनावयंसुहितेनेवजयामो॥गामश्वंपुष्टंपोषयित्नुचाहरेऽतिसनोमृळाती
दृशे॥बलेनवाधनेनवामृळतिर्दानकर्मातस्यैषापराभवति॥१५॥क्षेत्रस्यपतेमधुमंतमू
र्मिंधेनुरिवपयोअस्मासुधुक्ष्व॥मधुश्चुतंघृतऽमिवसुपूतमृतस्यनःपतयोमृळयंतु॥क्षे
त्रस्यपतेमधुमंतमूर्मिंधेनुरिवपयोस्मासुधुक्ष्वेऽतिमधुश्चुतंघृतऽमिवोदकंसुपूतमृतस्य
नःपातारोवापालऽयितारोवामृळयंतुमृळयऽतिरुपदयाकर्मापूजाकर्मावातघृतसमान्यामृ
चिसमानाभिव्याहारंभवतितज्जाऽमिभवतीत्येकंमधुमंतंमधुश्चुतऽमितियथायदेवसमा
नेपादेसमानाऽभिव्याहारंभवतितज्जाऽमिभवतीत्यपरंऽहिरण्यरूपःसऽहिरण्यसंदृऽगितियथा
यथाकथाचविशेषोजाऽमिभवतीत्यपरं॥मंडूकाइवोदकान्मंडूकाउदकाऽदिवेतियथा॥वा

स्तोष्पतिर्वास्तुर्वसतेर्निवासकर्मणस्तस्य पाता वा पालयिता वा तस्यैषा भवति ॥१६॥ अ
मीवहा वास्तोष्पते विश्वा रूपाण्याविशन् ॥ सखा सुशेव एधि नः ॥ अभ्यमनहा वास्तोष्प
ते सर्वाणि रूपाण्याविशन्त्सखा नः सुसुखो भव शेव इति सुखनाम शिष्यतेर्वकारो नामक
रणोंतस्थांतरोपलिंगी विभाषितगुणः शिवमित्यप्यस्य भवति यद्यद्रूपं कामयते तत्तद्देवता
भवति ॥ रूपंरूपं मघवा बोभवीतीत्यपि निगमो भवति वाचस्पतिर्वाचः पाता वा पालयिता वा त
स्यैषा भवति ॥१७॥ पुनरेहि वाचस्पते देवेन मनसा सह । वसोष्पते निरामय मय्येव तन्वं१ मम
॥ इति सा निगदव्याख्याताऽपांनपात्तनूनपात्रा व्याख्यातस्तस्यैषा भवति ॥१८॥ यो अनिध्मो
दीदयदप्स्वं१तर्यं विप्रास ईळते अध्वरेषु । अपांनपान्मधुमतीरपो दा याभिरिंद्रो वावृधे वी
र्याय ॥ योऽनिध्मो दीदयद्दीप्यतेऽभ्यंतरमप्सु यं मेधाविनः स्तुवंति यज्ञेषु सोऽपांनपान्मधुमती

रपोदेह्यभिषवाययाऽभिरिंद्रोवर्धतेवीर्यायवीरकर्मणेयमोयच्छतीऽतिसनतस्यैषाभवति
॥१९॥ परेऽयिवांसंप्रवतोमहीरनुबहुभ्यःपथामनुपस्पशानं। वैवस्वतंसंगमनंजनानां
यमंराजानंहविषादुवस्य॥ परेऽयिवांसंपयागतवंतंप्रवतउद्वतोऽनिवतइत्यवतिगतिक
र्मबहुभ्यःपंथानमनुपस्पाशायमानंवैवस्वतंसंगमनंजनानांयमंराजानंहविषादुवस्ये
ऽतिदुवस्यतीराध्नोऽतिकर्माऽग्निरऽपियमउच्यतेतमेताऋचोनुप्रवदंति॥२०॥ सेनेवसृष्टामं
दधात्यस्तुर्नऽदिद्युत्त्वेषप्रतीका॥ यमोहजातोयमोजनिऽत्वंजारःकनीनांपऽतिर्जनीनां॥ तंव
श्चराथावयंवसत्यास्तंनगावोनक्षंतइद्धं॥ इतिद्विपदाः सेनेवसृष्टाभयंवाबलंवादधात्य
स्तुरिवदिद्युत्त्वेषप्रतीकाभयप्रतीकाबलप्रतीकायशःप्रतीकामहाप्रतीकादीप्तप्रतीका
वा॥ यमोहजातइंद्रेणसहसंगतः॥ यमाऽविहेहमातरेत्यऽपिनिगमोभवतियमऽइवजातो

यमोजनिष्यमाणोजारःकनीनांजरयिताकन्यानांपतिर्जनीनांपालयिताजायानांतत्प्र
धानाहिपत्न्यःसंयोगेनभवंति॥तृतीयोअग्निष्टेपतिरित्यपिनिगमोभवतितंवश्वरापाच
रंतापश्चाहुत्वावसत्याचग्निवसंत्यौषधाहुत्वाऽस्तंयथागावआप्नुवंतितथाप्नुयामेहंस
मृद्धंभोगैर्मैश्रःश्रमीतेस्त्रायतेसंमन्वानोद्ववतीतिवामेदयतेपतिस्त्येषाभवति॥२१॥
मित्रोजनान्यातयतिब्रुवाणोमित्रोदाधारपृथिवीमुतद्यां॥मित्रःकृष्टीरनिमिषाभिचष्टेमि
त्रायहव्यंघृतवज्जुहोत॥मित्रोजनानायातयतिब्रुवाणःशब्दंकुर्वन्मित्रएवधारयतिपृ
थिवींचदिवंचमित्रःकृष्टीरनिमिषंनभिविपश्यतीतिकृष्टयइतिमनुष्यनामकर्मवंतो
भवंतिविकृष्टदेहावा॥मित्रायहव्यंघृतवज्जुहोतेतिव्याख्यातंजुहोतिर्दानकर्माकिःकमनो
वाक्रमणोवासुखोवानस्त्येषाभवति॥२२॥हिरण्यगर्भःसमवर्त्तताग्रेभूतस्यजातःपति

नि०उ०
३१

रेके आसीत्।सदाधारपृथिवींद्यामुतेमांकस्मैदेवायहविषा।विधेम॥हिरण्यगर्भोहिरण्य
मयोगर्भोहिरण्यमयोगर्भोस्येतिवा।गर्भोगृभेर्गृणात्यर्थे।गिरत्यनर्था।निति।वा।यदाहिस्त्रीगु
णान्गृह्णातिगुणाश्चास्या।गृह्यंतेऽथगर्भोभवतिसमभवदग्रेभूतस्यजातःपतिरेकोब
भूवसधारयतिपृथिवींच।दिवंचकस्मैदेवायहविषा।विधेमेतिव्याख्यातं।विधतिर्दानकर्मा
सरस्वान्व्याख्यातस्तस्यैषाभवति॥२३॥येतेसरस्वऊर्मयोमधुमंतोघृतश्चुतः॥तेभि
र्नोविताभव।इतिसा।निगदव्याख्याता॥२४॥विश्वकर्मासर्वस्यकर्तातस्यैषाभवति॥
२५॥विश्वकर्मा।विमनाआ।द्विहायाधाता।विधातापरमोतसंदृक्॥तेषा।मिष्टानि।समिषा
मदंति।यत्रासप्तऋषीन्परएकमाहुः॥विश्वकर्मा।विभूतमनाव्याप्ताधाताच।विधाताच
परमश्चसंद्रष्टाभूतानांतेषा।मिष्टानिवाकांतानि।वाक्रांतानि।वागतानि।वामतानि।वानता

राम
३१

निवाऽद्भिःसहसंमोदंतेयत्रैतानिसप्तऋषीणानिज्योतींषितेभ्यःपरआदित्यस्ता
न्येतस्मिन्नेकंभवतीत्यधिदैवतमथाध्यात्मंविश्वकर्माविभूतमनाव्याप्ताधाताचविधा
ताचपरमश्चसंद्रष्टेंद्रियाणामेषामिष्टानिवाकांतानिवाक्रांतानिवागतानिवामता
निवानतानिवाऽन्नेनसहसंमोदंतेयत्रेमानिसप्तऋषीणानींद्रियाण्येभ्यःपरआत्मा
तान्येतस्मिन्नेकंभवतीत्यात्मगतिमाचष्टेतत्रेतिहासमाचक्षतेविश्वकर्माभौवनःसर्व
मेधेसर्वाणिभूतानिजुहवांचकारसआत्मानमप्यंततोजुहवांचकारतदभिवादिन्ये
षर्ग्भवतियइमाविश्वाभुवनानिजुह्वदितितस्योत्तराभूयसेनिर्वचनाय॥२६॥विश्व
कर्मन्हविषावावृधानःस्वयंयजस्वपृथिवीमुतद्यां।मुह्यंत्वन्येअभितोजनासइहा
स्माकंमघवासूरिरस्तु।विश्वकर्मन्हविषावर्द्धयमानःस्वयंयजस्वपृथिवींचदिवंच

मृष्यंतन्ये अभितोजनाः सपत्नाइहास्माकंमघवासूरिरस्तुप्रज्ञातातार्क्ष्यस्त्वष्ट्राव्याख्या
तंस्तीर्णेंतरिक्षेक्षियतितूर्णमर्थंरक्षत्यश्नोतेर्वातस्यैषाभवति।।२७।।त्यमूषुवाजिनंदेव
जूतंसहावानंतरुतारंरथानां।अरिष्टनेमिंपृतनाजमाशुंस्वस्तयेतार्क्ष्यमिहाहुवेम।।तंभृ
शमभवंतंजूतिर्गतिःप्रीतिर्वादेवजूतंदेवगतंदेवप्रीतंवासहस्वंतंतारयितारंरथानामरि
ष्टनेमिंपृतनाजितमाशुंस्वस्तयेतार्क्ष्यमिहह्वयेमेतिकमन्यंमध्यमादेवमवक्ष्यत्तस्यैषाप
राभवति।।२८।।सद्यश्चिद्यःशवसापंचकृष्टीःसूर्यइवज्योतिषापस्ततान।सहस्रसाः
शतसा अस्यरंहिर्नस्मावरंतेयुवतिंनशर्यां।।सद्योपियःशवसाबलेनतनोत्यपःसूर्य
इवज्योतिषापंचमनुष्यजातानिसहस्रसानिनीशतसानिन्यस्यसागतिर्नस्मैनांवारयं
तिप्रयुवतीमिवशरमयीमिषुंमन्युर्मन्यतेर्दीप्तिकर्मणःक्रोधकर्मणोवधकर्मणोवामन्यु

सस्मादिषवस्तस्यैषाभवति॥१९॥त्वयामन्योसरथमारुजंतोहर्षमाणासोधृषिताम
रुत्वः॥तिग्मेषवआयुधासंशिशानाअभिप्रयंतुनरोअग्निरूपाः॥त्वयामन्योसरथमारु
धरुजंतोहर्षमाणासोधृषितामरुत्वस्तिग्मेषवआयुधानिसंशिश्यमानाअभिप्रयंतु
नरोअग्निरूपाअग्निकर्माणःसनद्धाःकवचिनइतिवादधिक्राव्याख्यातस्तस्यैषाभव
ति॥२०॥आदधिक्राःशवसापंचकृष्टीःसूर्यइवज्योतिषापस्ततान॥सहस्रसाःशत
सावार्वापृणक्तुमध्वासमिमावचांसि॥आतनोतिदधिक्राःशवसाबलेनापःसूर्यइवज्यो
तिषापंचमनुष्यजातानिसहस्रसाःशतसावाजीवेजनवानर्वेरणवांत्संपृणक्तुनोमधु
नोदकेनवचनानीमानीतिमधुधमतेर्विपरीतस्यसवितासर्वस्यप्रसवितातस्यैषाभवति
॥२१॥सवितायंत्रैःपृथिवीमरम्णादस्कंभनेसविताद्यामदृंहत्॥अश्वमिवाधुक्षद्धु

निमंतरिक्षमतूर्तेबद्धंसवितासमुद्रं।।सवितायंत्रैःपृथिवीमरमयदनारंभणेंतरिक्षेसवि
ताद्यामदृंहदश्वमिवाधुक्षद्धुनिमंतरिक्षेमेघंबद्धमतूर्तेबद्धमतूर्णइतिवात्वरमाणइतिवा
सवितासमुद्तारमितिकमन्यंमध्यमादेवमवक्ष्यदादित्योपिसवितोच्यतेतथाचहैरण्यस्तू
पैस्तुतोर्चन्हिरण्यस्तूपऋषिरिदंसूक्तंप्रोवाचतदभिवादिन्येषर्ग्भवति।।२१।।हिरण्यस्तूपः
सवितर्यथात्वांगिरसोजुह्वेवाजेअस्मिन्।एवात्वार्चन्नवसेवंदमानःसोमस्येवांशुंप्रतिजा
गराहं।हिरण्यस्तूपोहिरण्यमयस्तूपोहिरण्मयस्तूपोस्येतिवास्तूपःस्त्यायतेःसंघातःस
वितर्यथात्वांगिरसोजुह्वेवाजेऽस्मिन्नेवंत्वार्चन्नवनायवंदमानःसोमस्येवांशुंप्रतिजाग
र्यहंत्वष्टाव्याख्यातस्तस्यैषाभवति।।२२।।देवस्त्वष्टासविताविश्वरूपःपुपोषप्रजाःपु
रुधाजजान।इमाचविश्वाभुवनान्यस्यमहद्देवानामसुरत्वमेकं।।देवस्त्वष्टासवितासर्व

रूपः पोषयतिप्रजारसानुप्रदानेनबहुधाविभाजयन्तीमाग्निवत्सर्वाणिभूतान्युदकान्यस्य
महच्चास्मैदेवानामसुरत्वमेकंप्रज्ञावत्त्वंवाऽनवत्त्वंवापिवासुरितिप्रज्ञानामास्यत्यनर्थानस्ता
श्चास्यामर्था असुरत्वमादिलुप्तंवातोवातीतिसतस्तस्यैषाभवति।।३४।।वातआवातुभे
षजंशंभुमयोभुनोहृदे।प्रणआयूंषितारिषत्।।वातआवातुभैषज्यानिशंभुमयोभुचनो
हृदयायप्रवर्द्धयतुचनआयुरग्निर्व्याख्यातस्तस्यैषाभवति।।३५।।प्रतित्यंचारुमध्वरंगोपी
थायप्रहूयसे।।मरुद्भिरग्नआगहि।।तंप्रतिचारुमध्वरंसोमपानायप्रहूयसेसोऽग्नेमरुद्भिः
सहागच्छेतिकमन्यंमध्यमादेवमवक्ष्यत्तस्यैषापराभवति।।३६।।अभित्वापूर्वपीतयेसृ
जामिसोम्यंमधु।।मरुद्भिरग्नआगहि।।अभिसृजामित्वापूर्वपीतयेपूर्वपानायसोम्यंमधु
सोममयंसोऽग्नेमरुद्भिःसहागच्छेति।।३७।।वेनोवेनतेःकान्तिकर्मणस्तस्यैषाभवति।।३८।।

अयंवेनश्चोदयत्पृश्निगर्भाज्योऽतिर्जरायूरजसोऽविमाने।।इममपांसंगमेसूर्यस्यऽशिशुंनऽवि
प्रामतिभीरिहंति।। अयंवेनश्चोदयत्पृश्निगर्भाः प्राश्ववर्णगर्भा आपइऽतिवाज्योऽतिर्जरायु
ज्योऽतिरस्यजरायुःस्थानीयंभवऽतिअरायुजरयागर्भस्यजरयायूयतइऽतिवेममपांचसंगम
नेसूर्यस्यचऽशिशुमिवऽविप्रामऽतिभीरिहंतिऽलिहंऽतिस्तुवंऽतिवर्धयंऽतिपूजयंतीऽतिवाऽशिशुः
शंसनीयोभवऽतिऽशिशीतेर्वास्याद्दानकर्मणश्चिरलब्धोगर्भोभिवत्पसुनेऽतिरस्तूऽनयऽतित
स्यैषाभवऽति।।३९।।असुनीतेमनोअस्मासुधारयजीवातवेसुप्रऽतिरानआयुःऽरारंऽधिनः
सूर्यस्यसंदृऽशिघृतेनत्वंतन्वंवर्धयस्व।।असुनीतेमनोस्मासुधारयऽचिरंजीवनायप्रवर्द्ध
यचनआयूरंधपचनःसूर्यस्यसंदर्शनायरध्यऽतिर्वशगमनेऽपिदृश्यते।।मारधामऽद्विषतेसो
मराजऽन्नित्यपिऽनिगमोभवतिघृतेनत्वमात्मानंतन्वंवर्द्धयस्वचोव्याख्यातंस्तस्यैषाभवति

॥४०॥ऋतस्यहिशुरुधःसंतिपूर्वीरृतस्यधीतिर्वृजिनानिहंति। ऋतस्यश्लोकोबधिरा
ततर्दकर्णाबुधानःशुचमानआयोः॥ऋतस्यहिशुरुधःसंतिपूर्वीऋतस्यप्रज्ञावर्जनीया
निर्हंत्यृतस्यश्लोकोबधिरस्यापिकर्णावातृणत्तिबधिरोबद्धश्रोत्रःकर्णौबोधयन्दीप्यमान
श्चायोरयनस्यमनुष्यस्यज्योतिषोवोदकस्यवेंदुरिंधेरुनत्तेर्वातिस्यैषाभवति॥४१॥प्रतद्वो
चेयंभव्यायेंदवेहव्योनयइषवान्मन्मरेजतिरक्षोहामन्मरेजति॥स्वयंसोअस्मदानिदोव
धैरजेतदुर्मतिं।अवस्रवेदघशंसोवतरमवक्षुद्रमिवस्रवेत्॥प्रब्रवीमितद्भव्यायेंदवेहव
नार्हइवयइषवान्भवान्कामवान्वामननानिव्वनोरेजयतिरक्षोहाचबलेनरेजयतिस्वयंसो
स्मदभिनिंदितारंवधैरजेतदुर्मतिं॥अवस्रवेदघशंसस्ततश्चावतरंक्षुद्रमिवावस्रवेदभ्या
सेभूयांसमर्थंमन्यंतेयथाहोदर्शनीयाहोदर्शनीयेतितत्परुछेपस्यशीलंपरुछेपऋषिःपर्व

नि० उ०
३५

वच्छेपः परुषपरुषि शेपोऽस्येतवेतीमानि सप्तविंशतिर्दैवतानामधेयान्यनुक्रांतानिसू
क्तभांजिहविर्भांजितेषामेतान्यहविर्भांजिवेनोसुनीतिर्ऋतइंदुः प्रजापतिः प्रजानांपाता
वापालयितावातस्यैषाभवति ॥४२॥ प्रजापतेनत्वदेतान्यन्योविश्वाजातानिपरितावभू
व । यत्कामास्तेजुहुमस्तंनो अस्तुवयंस्यामपतयोरयीणां ॥ प्रजापतेनहित्वदेतान्यन्यः
सर्वाणिजातानितानिपरिबभूवयत्कामास्तेजुहुमस्तंनो अस्तुवयंस्यामपतयोरयीणा
मित्यादि अहिर्व्याख्यातस्तस्यैषाभवति ॥४३॥ अब्जामुक्थैरहिंगृणीषेबुध्नेनदीनांर
जःसुषीदन् ॥ अप्सुजमुक्थैरहिंगृणीषेबुध्नेनदीनांरजःसूदकेषुसीदन्बुध्नमंतरिक्षं
बद्धा अस्मिंधृता आपइतिवेदमपीतरद्बुध्नमेतस्मादेवबद्धा अस्मिन्धृताः प्राणाइतियो
हिः सबुध्न्योबुध्नमंतरिक्षंतन्निवासात्तस्यैषाभवति ॥४४॥ मानोऽहिर्बुध्न्योरिषेधान्माय

राम
३५

ङ्गोअस्यग्निरिधहतायोः ।। माचनोऽहिर्बुध्न्योरेषणायधाम्नास्ययज्ञोरवाचोऽस्रेधयज्ञका
मस्यसुपर्णोव्याख्यातस्तस्यैषाभवति ।। ४५ ।। एकःसुपर्णःससमुद्रमाविवेशसइदंवि
श्वंभुवनंविचष्टे ।। तंपाकेनमनसापश्यमंतितस्तंमातारेळ्हिसउरेळ्हिमातरं ।। एकःसु
पर्णःससमुद्रमाविशतिसइमानिसर्वाणिभूतान्यभिविपश्यतितंपाकेनमनसापश्य
मंतितस्तर्षेर्दृष्टार्थस्यप्रीतिर्भवत्याख्यानसंयुक्तातंमातारेळ्हिवागेषामाध्यमिकासउ
मातरंरेळ्हिपुरूरवाबहुधारोरूयतेतस्यैषाभवति ।। ४६ ।। समस्मिञ्जायमानआसत
ग्नाउतेमवर्द्धन्नघः१स्वमूर्त्ताः । महेयत्त्वापुरूरवोरणायावर्द्धयन्दस्युहत्यायदेवाः ।। स
मास्तास्मिञ्जायमानेग्नागमनाद्दापोदेवपत्न्योवाऽपिचैनमवर्द्धयन्नघःस्वगूर्त्ताःस्व
यंगामिन्योमहतेचयत्त्वापुरूरवोरणायरमणीयायसंग्रामायावर्द्धयन्दस्युहत्यायच

नि०उ०
२६

दैवादेवाः॥४७॥अथातोमध्यस्थानावायवायास्यासस्त्वाएगासोनीचीनबारंतमूष्वमा
रुद्राययानेऽइन्दुज्जराबोधाद्दर्दर्योजातोऽविघ्नक्षांनश्मापिनद्धमइमास्यमवतंक्षेत्रस्य
पतेःक्षेत्रस्यपतिनाक्षेत्रस्यपतेमीवहापुनरेऽहेयोअग्निध्मःपरेऽयवांसंसेनेवसृष्टा
मित्रोजनान्हिरण्यगर्भेयितेसरस्वतीऽविश्वकर्मासर्वस्यकर्त्ताविश्वकर्माविमनाविश्व
कर्मन्हविषात्यमूषुसधाम्नेत्त्वयामान्योआदधिक्राःसविताहिरण्यस्तूपोदेवस्त्वष्टा
वातआवातुमतेत्यमभित्वावेनोवेनतेरयंवेनोसुनीतऋतस्यऽहिप्रलद्धोवेयंप्रजा
पतेऽजामुकेडेमानोऽहिर्बुरिकःसुपर्णःसमस्मिन्ससचत्वारिंशत्॥ ॥इतिनिरुक्ते
उत्तरषट्केचतुर्थोध्यायः॥ ॥ॐ॥श्येनोव्याख्यातस्तस्यैषाभवति॥१॥आदायश्येनो
अभरत्सोमंसहस्रंसवांअयुतंचसाकं॥अत्रापुरंधिरजहादरातीर्मदेसोमस्यमू

राम
२६

राअमूरः॥ आदायश्येनोहरत्सोमंसहस्रंसवानयुतंचसहसहस्रसाव्यमभिप्रेत्यतत्रायु
तंसोमभक्षास्तत्संबधेनायुतंदक्षिणाइतिवातअपुरंधिरजहादमित्रानदानानितिवामदेसो
मस्यमूराअमूरइत्यैंद्रेचसूक्तेसोमपानेनचस्तुतस्तस्मादिंद्रंमन्यंत ओषधिःसोमःसु
नोतेर्यदेनमभिषुण्वंतिबहुलमस्यनेघंटुकंवृत्तमाश्चर्यमिवप्राधान्येनतस्यपावमानीषु
निदर्शनायोदाहरिष्यामः॥२॥स्वादिष्ठयामदिष्ठयापवस्वसोमधारया॥इंद्रायपातवेसु
तः॥इतिसानिगदव्याख्याताथैषापराभवतिचंद्रमसोवैतस्यवा॥३॥सोमंमन्यतेपपिवान्य
त्संपिंषंत्योषधिं॥सोमंयंब्रह्माणोविदुर्नतस्याश्नातिकश्चन॥सोमंमन्यतेपपिवान्यत्संपि
षंत्योषधिमितिवृथासुतमसोममाहसोमंयंब्रह्माणोविदुरितिनतस्याश्नातिकश्चनायज्वेत्य
धियज्ञमथाभिदेवतंसोमंमन्यतेपपिवान्यत्संपिंषंत्योषधिमितियजुःसुतमसोममाह

नि०उ०
३८

सोमंयंब्रह्माणोविदुश्चंद्रमसंनतस्याश्नातिकश्चनादेवइत्यथैषापराभवतिचंद्रमसोवैतस्य
वा॥४॥यत्वादेवप्रपिबंतितत आप्यायसेपुनः॥वायुःसोमस्यरक्षितासमानांमासआकृ
तिः॥यत्वादेवप्रपिबंतितत आप्यायसेपुनरितिनाराशंसानभिप्रेत्यपूर्वपक्षापरपक्षाविति
वावायुःसोमस्यरक्षितावायुमस्यरक्षितारमाहसाहचर्याद्रसहरणाद्वासमानांसंवत्सराणां
मासआकृतिःसोमोरूपविशेषैरोषधिश्चंद्रमावाचंद्रमाश्चायंद्रमतिचंद्रोमाताचांद्रंमान
मस्येतिवाचंद्रश्चंदतेःकांतिकर्मणश्चंदनमित्यप्यस्यभवतिचारुद्रमतिचिरंद्रमतिचमे
र्वापूर्वंचारुरुचेर्विपरीतस्यतस्यैषाभवति॥५॥नवोनवोभवतिजायमानोह्नांकेतुरुषसा
मेत्यग्रं॥भागंदेवेभ्योविदधात्यायन्प्रचंद्रमास्तिरतेदीर्घमायुः॥नवोनवोभवतिजायमान
इतिपूर्वपक्षादिमभिप्रेत्याह्नांकेतुरुषसामेत्यग्रमित्यपरपक्षांतमभिप्रेत्यादित्यदैवतोद्वि

राम
३८

तीयःपादइत्येकेभागंदेवेभ्योविदधात्यायन्नित्यर्द्धमासेज्यामभिप्रेत्यप्रवर्द्धयतेचंद्रमादीर्घ
मायुर्मृत्युमरियतीतिसतोमृतंच्यावयतीतिवाशतबलाक्षोमौद्गल्यस्तस्यैषाभवति॥६॥प
रंमृत्योअनुपरेहिपंथांयस्तेस्वइतरोदेवयानात्॥चक्षुष्मतेशृण्वतेतेब्रवीमिमानःप्रजांरी
रिषोमोतवीरान्॥परंमृत्योध्रुवंमृत्योऽध्रुवपरेहिमृत्योकथितंतेनमृत्योमृतंच्यावयतेभवति
मृत्योमदेवम्हिदेवतेषामेषाभवति॥७॥त्वेषमित्थासमरणंशिमीवतोरिंद्राविष्णूसुत
पावामुरुष्यति॥यामर्त्यायप्रतिधीयमानमित्कृशानोरस्तुरसनामुरुष्यथः॥इतिसाग्निग
दव्याख्याताविश्वानरोव्याख्यातस्तस्यैषाभवति॥८॥प्रवोमहेमंदमानायांधसोर्चाविश्वा
नरायविश्वाभुवे॥इंद्रस्ययस्यसुमखंसहोमहिश्रवोनृम्णंचरोदसीसपर्यतः॥प्रार्चतेत्यु
यंस्तुतिंमहतेंधसोन्नस्यदात्रेमंदमानायमोदमानायस्तूयमानायशब्दाय्यमानायेतिवावि

श्वानरायसर्वंविभूतायैंद्रस्ययस्यप्रीतौसुमहद्बलंमहश्चश्रवणीयंयशोद्युम्नंचबलंएभतं
द्यावापृथिव्योवःपरिचरतइतिकमन्यंमध्यमादेवमवक्ष्यत्तस्यैषापराभवति॥९॥उदुज्यो
तिरमृतंविश्वजन्यंविश्वानरःसवितादेवोअश्रेत॥उदशिश्रियज्ज्योतिरमृतंसर्वजन्यंवि
श्वानरःसवितादेवइतिधातासर्वस्यविधातातस्यैषाभवति॥१०॥धाताददातुदाशुषेप्रा
चींजीवातुमक्षितां॥वयंदेवस्यधीमहिसुमतिंसत्यधर्मणः॥धाताददातुदत्तवतेप्रवृद्धां
जीविकामनुपक्षीणांवयंदेवस्यधीमहिसुमतिंकल्याणींमतिंसत्यधर्मणोविधाताधात्रा
व्याख्यातस्तस्यैषनिपातोभवतिबहुदेवतायामृचि॥११॥सोमस्यराज्ञोवरुणस्यधर्मणि
बृहस्पतेरनुमत्याउशर्मणि॥तवाहमद्यमघवन्नुपस्तुतौधातर्विधातःकलशाँअभक्षयं॥
इत्येताभिर्देवताभिरभिप्रसूतःसोमकलशानभक्षयमितिकलशःकस्मात्कलाअस्मि

न्छेरतेमात्राः कलिश्चकलाश्चकिरतेर्विकीर्णमात्राः ॥१२॥ अथातोमध्यस्थानादेवग
णास्तेषांमरुतः प्रथमगामिनोभवंतिमरुतोमितराविणोवामितरोचिनोवामहद्द्रवंती
तिवातेषामेषाभवति ॥१३॥ आविद्युन्मद्भिर्मरुतः स्वर्कैरथेभिर्यातऋष्टिमद्भिरश्वपर्णैः
॥ आवर्षिष्ठयानइषावयोनपप्तता सुमायाः ॥ विद्युन्मद्भिर्मरुतः स्वर्कैः स्वंचनैरितिवा
स्वर्चनैरितिवास्वर्चिभिरितिवारथैरायानऋष्टिमद्भिरश्वपर्णैरश्वपतनैर्वर्षिष्ठेनचनो
न्नेनवयइवापततसुमायाः कल्याणकर्माणोवाकल्याणप्रज्ञावारुद्राव्याख्यातास्तेषामे
षाभवति ॥१४॥ आरुद्रासइंद्रवंतः सजोषसोहिरण्यरथाः सुवितायगंतन ॥ इयंवोअ
स्मत्प्रतिहर्यतेमतिस्तृष्णजेनदिवउत्साउदन्यवे ॥ आगच्छतरुद्राइंद्रेणसहजोषणाः सु
वितायकर्मणइयंवोस्मदपिप्रतिकामयतेमतिस्तृष्णजइवदिवउत्साउदन्यवेतृष्णक्तृ

ब्यतैरूरुदन्युरुदन्यंतेऋभवउरुभांतीतिवर्त्तेनभांतीतिवर्त्तेनभवंतीतिवातेषामेषाभवति
॥१५॥विष्ट्वीशमीतरणित्वेनवाघतोमर्तासिःसंतोअमृतत्वमानशुः।सौधन्वाऋभवःसू
रचक्षसःसंवत्सरेसमपृच्यंतधीतिभिः॥कृत्वाकर्माणिक्षिप्रत्वेनवोढारोमेधाविनोवाम
र्तासिःसंतोमृतत्वमानशिरेसौधन्वनाऋभवःसूरख्यानावासूरप्रज्ञावासंवत्सरेसम
पृच्यंतधीतिभिःकर्मभिर्ऋभुर्विभ्वावाजइतिसुधन्वनआंगिरसस्यत्रयःपुत्राबभूवुस्ते
षांप्रथमोत्तमाभ्यांबहुवन्निगमाभवंतिनमध्यमेनतदेतदृभोश्चबहुवचनेनचमसस्यच
संस्तवेनबहूनिदशतयीषुसूक्तानिभवंत्यादित्यरश्मयोप्यृभवउच्यंते।अगोह्यस्ययदस
स्तनागृहेतदद्येदमृभवोनानुगच्छथ॥आगोह्यआदित्योगूहनीयस्तस्ययदस्वपथगृहे
यावत्तत्रभवथनतावदिहभवथेत्यंगिरसोव्याख्यातास्तेषामेषाभवति॥१६॥विरूपासइ

ऋषयस्तइद्गंभीरवेपसः । ते अंगिरसः सूनवस्ते अग्नेः परिजज्ञिरे ॥ बहुरूपाऋषय
स्तेगंभीरकर्माणोवागंभीरप्रज्ञावातेंगिरसः पुत्रास्तेग्नेरधिजज्ञिरइत्यग्निजन्म पितरो
व्याख्यातास्तेषामेषाभवति ॥१७॥ उदीरतामवरउत्परासउन्मध्यमाः पितरः सोम्यासः
। असुंयईयुरवृकाऋतज्ञास्तेनोवंतु पितरोहवेषु ॥ उदीरतामवरउदीरतांपरउदीर
तांमध्यमाः पितरः सोम्याः सोमसंपादिनस्तेसुंयेप्राणमन्वीयुरवृकाअनमित्राः सत्य
ज्ञावायज्ञज्ञावातेन आगच्छंतु पितरोह्वानेषुमाध्यमिकोयमइत्याहुस्तस्मान्माध्यमिका
न्पितृन्मन्यंतेऽगिरसोव्याख्याताः पितरोव्याख्याताभृगवोव्याख्याता अथर्वाणोथनवं
तस्थर्वतिश्चरतिकर्मातत्प्रतिषेधस्तेषामेषासाधारणाभवति ॥१८॥ अंगिरसोनः पित
रोनवगतयोनवनीतगतयोवाऽथर्वाणोभृगवः सोम्याः सोमसंपादिनस्तेषांवयंसुमतौ

कल्याण्यांमतौयज्ञियानामपिचैषांभद्रेभंदनीयेभाजनवन्तिवाकल्याणेमनसिस्यामेति
माध्यमिकोदेवगणइतिनैरुक्ताःपितरइत्याख्यानमथाप्यृषयःस्तूयन्ते॥१९॥सूर्यस्ये
ववक्षथोज्योतिरेषांसमुद्रस्येवमहिमागंभीरः।वातस्येवप्रजवोनान्येनस्तोमोवसिष्ठा
अन्वेतवेवः॥इतियथाआस्माआभोतैस्तेषामेषनिपातोभवत्यैंद्र्यामृचि॥२०॥स्तुषेय्यं
पुरुवर्पसमृभ्वमिनतममाप्त्यमाप्त्यानां॥आदर्षतेशवसासप्तदानून्प्रसाक्षतेप्रतिमा
नानिभूरि॥स्तोतव्यंबहुरूपमुरुभूतमीश्वरतममाप्तव्यमाप्तव्यानामादृणातियःशव
साबलेनसप्तदातॄनितिवासप्तदानवानितिवाप्रसाक्षतेप्रतिमानानिबहूनिसाक्षतिरा
प्नोतिकर्मा॥२१॥अथातोमध्यस्थानास्त्रियस्तासामदितिःप्रथमागामिनीभवत्यदि
तिर्व्याख्यातातस्याएषाभवति॥२२॥दक्षस्यवादितेजन्मनिव्रतेकर्मणिराजानोमि

भावरुणोपरिचरसि विवासतिः परिचर्यायां हविष्माँ आविवासतीत्याद्गास्तेवाऽतू
र्तपंथा अत्वरमाणपंथा बहुरथ्यो यमादित्योरग्नियच्छतेसमहोतासमास्मैरश्मयोर
सानभिसंनामयंतेसस्तेनमृषयः स्तुवंतीति वा विषमरूपेषु जन्मसु कर्मस्वादित्येष्वादि
त्योदक्ष इत्याहुरादित्यमध्ये च स्तुतोऽदितिर्दाक्षायणी ॥ अदितेर्दक्षो अजायत दक्षाद्वदि
तिः परीति च तत्कथमुपपद्येत समानजन्मानौ स्यातामित्यपि वा देवधर्मेणेतरेतरजन्मा
नौ स्यातामितरेतरप्रकृती अग्निरप्यदितिरुच्यते तस्यैषा भवति ॥२३॥ यस्मै त्वं सुद्र
विणो ददाशोऽनागास्त्वमदिते सर्वताता ॥ यं भद्रेण शवसा चोदयासि प्रजावता राधसा ते स्या
म ॥ यस्मै त्वं सुद्रविणो ददास्यनागास्त्वमनपराधत्वमदिते सर्वासु कर्मततिष्वागः आङ्
पूर्वाद्गमेरेन एनेः किल्बिषं किल्बिदं सुकृतकर्मणो भयं कीर्तिमस्य भिनत्तीति वा यं भ

द्रेणइवसाबलेनचोदयित्रीप्रजाअवतान्नराधसाधनेनेतिवयमिहस्यामेतिसरमासरणा
त्तस्याएषाभवति॥२४॥किमिच्छंतीसरमाप्रेदमानडूदूरेह्यध्वाजगुरिःपराचैः॥कास्मे
हितिःकापरितक्म्यासीत्कथंरसायाअतरःपयांसि॥किमिच्छंतीसरमेदंप्रानड्दूरेह्यध्वा
जगुरिर्जंगम्यतेःपरांचैरंचितःकातेस्मात्त्वर्थहितिरासीत्किंपरितकनंपरितक्म्या
रात्रिःपरितएनांतक्मतक्मेत्युष्णनामतकतइतिसतःकथंरसायाअतरःपयांसीतिर
सानदीरसतेःशब्दकर्मणःकथंरसानितान्युदकानीतिवादेवशुनींद्रेणप्रहितापणि
भिरसुरैःसमूदइत्याख्यानंसरस्वतीव्याख्यातातस्याएषाभवति॥२५॥पावकानःसर
स्वतीवाजेभिर्वाजिनीवती॥यज्ञंवष्टुधियावसुः॥पावकानःसरस्वत्यन्नैरन्नवतीयज्ञं
वष्टुधियावसुःकर्मवसुस्तस्याएषापराभवति॥२६॥महोअर्णःसरस्वतीप्रचेतयति

केतुना॥धियोविश्वाविराजति॥महदर्णःसरस्वतीप्रचेतयतिप्रज्ञापयतिकेतुनाकर्म
णाप्रज्ञयावेमानिचसर्वाणिप्रज्ञानान्यभिविराजतिवागर्थेषुवधीयतेतस्मान्माध्यमि
कांवाचंमन्यंतेवाग्व्याख्यातातस्याएषाभवति॥२७॥यद्वाग्वदंत्यविचेतनानिराष्ट्री
देवानांनिषसादमंद्रा।चतस्रऊर्जंदुदुहेपयांसिक्वस्विदस्याःपरमंजगाम॥यद्वाग्व
दंत्यविचेतनान्यविज्ञातानिराष्ट्रीदेवानांनिषसादमंद्रामदनाचतस्रोनुदिशाऊर्जंदुदु
हेपयांसिक्वस्विदस्याःपरमंजगामेतियत्पृथिवींगच्छतीतिवायदादित्यरश्मयोहरं
तीतिवातस्याएषापराभवति॥२८॥देवींवाचमजनयंतदेवास्तांविश्वरूपाःपशवोवदं
ति।सानोमंद्रेषमूर्जंदुहानाधेनुर्वागस्मानुपसुष्टुतैतु।देवींवाचमजनयंतदेवास्तांस
र्वरूपाःपशवोवदंतिव्यक्तवाचश्चाव्यक्तवाचश्चसानोमदनान्नंचरसंचदुहानाधेनुर्वा

गस्मानुपैतुसुष्टुतानुमतीराकेतिदेवपत्न्याऽवितिनैरुक्ताः पौर्णमास्याऽवितियाऽज्ञिकाया
पूर्वापौर्णमासीसानुमतिर्योत्तरासाराकेतिऽविज्ञायतेऽनुमतिरनुमननात्तस्याएषाभव
ति॥२९॥ अन्विदनुमतेत्वंमन्यासैषंचनस्कृधि॥ क्रत्वेदक्षायनोऽहिनुप्रणआयूंषिता
रिषः॥ अनुमन्यस्वानुमतेत्वंसुखंचनःकुर्वन्नंचनोपत्यायधेहिप्रवर्द्धयचनआयूंषिरा
कारातेर्द्दानकर्मणस्तस्याएषाभवति॥३०॥ राकामहंसुहवांसुष्टुतीहुवेशृणोतुनःसुभ
गाबोधतुत्मना। सीव्यत्वपःसूच्याऽच्छिद्यमानयाददातुवीरंशतदायमुक्थ्यं॥ राकामहं
सुह्वानांसुष्टुत्याह्वयेशृणोतुनःसुभगाबोधत्वात्मनासीव्यत्वपःप्रजननकर्मसूच्याऽच्छि
द्यमानयासूचीसीव्यतेर्ददातुवीरंशतमदमुक्थ्यंवक्तव्यप्रशंसंऽसिनीवालीकुहूरिति
देवपत्न्याऽवितिनैरुक्ताअमावास्येइतियाऽज्ञिकायापूर्वामावास्यासाऽसिनीवालीयोत्तरा

साकुहूरितिविज्ञायतेऽसिनीवालीऽसिनमन्नंभवतिऽसिनाऽतिभूताऽनिवालंपर्ववृणोतेस्तऽस्मिन
भवतीवालिनीवाबालेनेवास्यामणुत्वाच्चंद्रमाःसेऽवितव्योभवतीऽतिवातस्याएषाभवति॥
३१॥सिनीवालिपृथुष्टुकेयादेवानामऽसिस्वसा॥जुषस्वहव्यमाहुतंप्रजांदेऽविदिऽदिड्ढिनः॥
ऽसिनीवालिपृथुजघनेस्तुकःस्त्यायतेःसंघातःपृथुकेशस्तुकेपृथुस्तुकेवायात्वंदेवानामऽसि
स्वसास्वसासुअसास्वेषुसीदतीऽतिवाजुषस्वहव्यमदनंप्रजांचदेऽविदिऽशानःकुहूर्गूहते
क्वाभूदिऽतिवाक्वसतीहूयतइऽतिवाक्वाहुतंहऽविर्जुहोतीऽतिवातस्याएषाभवति॥३२॥कुहू
महंसुवृतंऽविद्मनापसमऽस्मिन्यज्ञेसुहवांजोहवीऽमि॥सानोददातुश्रवणंऽपितॄणांतस्यैते
देऽविहविषाऽविधेम॥कुहूमहंसुकृतंऽविदितकर्माणमऽस्मिन्यज्ञेसुह्वानामाह्वयेसानोददा
तुश्रवणंऽपितॄणांऽपित्र्यंधनऽमितिवाऽपित्र्यंयशइऽतिवातस्यैतेदेऽविहऽविषाऽविधेमेऽतिव्याख्यातं

नि०उ०
४३

यमीव्याख्यातातस्याएषाभवति॥३३॥अन्यमूषुत्वंयम्यन्यउत्वांपरिष्वजातेलिबुजेववृक्षं
॥तस्यवात्वंमनइछासवातवाधाकृणुष्वसंविदंसुभद्रां॥अन्यमेवहित्वंयम्यन्यस्त्वांपरि
ष्वंक्ष्यतेलिबुजेववृक्षंतस्यवात्वंमनइछसवातवाधानेनकुरुष्वसंविदंसुभद्रांकल्याण
भद्रांयमीयमंचकमेतांप्रत्याचचक्षइत्याख्यानं॥३४॥उर्वशीव्याख्यातातस्याएषाभवति
॥३५॥विद्युन्नयापतंतीदविद्योद्भरंतीमेअप्याकाम्यानि॥जनिष्टोअपोनर्यःसुजातःप्रोर्व
शीतिरतदीर्घमायुः॥विद्युदिवयापतंत्यद्योततहरंतीमेअप्याकाम्यान्युदकान्यंतरिक्षलोक
स्ययदानूनमयंजायेत॥अद्भ्योध्यपइतिनर्येभिनृभ्योनृभ्योहितोनरापत्यमितिवासुजातःसुजा
ततरोथोर्वशीप्रवर्द्धयतेदीर्घमायुः॥पृथिवीव्याख्यातातस्याएषाभवति॥३६॥बळित्था
पर्वतानांखिद्रंबिभर्षिपृथिवि॥प्रयाभूमिंप्रवत्वतिमह्नाजिनोषिमहिनि॥सत्यंत्वंपर्व

राम
४३

तानांमेघानांखेदनंछेदनंभेदनंबलम्पुत्रधारयसिपृथिविप्रजिन्वसियाभूमिंप्रवणवति
महत्वेनमहतीत्युदकवतीतिवेंद्राणींद्रस्यपत्नीतस्याएषाभवति॥३७॥इंद्राणीमासुना
रिषुसुभगामहमश्रवं॥नह्यस्याअपरंचनजरसामरतेपतिर्विश्वस्मादिंद्रउत्तरः॥इंद्रा
णीमासुनारिषुसुभगामहवश्रृणवंनह्यस्याअपरामपिसमांजरयाम्रियतेपतिःसर्वस्मा
यइंद्रउत्तरस्तमेतद्ब्रूमस्तस्याएषापराभवति॥३८॥नाहमिंद्राणिरारणसख्युर्वृषाकपेर्ऋ
ते॥यस्येदमप्यंहविःप्रियंदेवेषुगच्छतिविश्वस्मादिंद्रउत्तरः॥नाहमिंद्राणिरमेसख्युर्वृषा
कपेर्ऋतेयस्येदमप्यंहविरप्सुसंभृतमद्भिःसंस्कृतमितिवाप्रियंदेवेषुनिगच्छतिसर्वस्माद्यइं
द्रउत्तरस्तमेतद्ब्रूमोगौरीरोचतेर्ज्वलतिकर्मणोयमपीतरोगौरोवर्णएतस्मादेवप्रशस्योभव
तितस्याएषाभवति॥३९॥गौरीर्मिमायसलिलानितक्षत्येकपदीद्विपदीसाचतुष्पदी।अष्ट

नि०उ०
४४

पदीनवपदीबभूवुषीसहस्राक्षरापरमेव्योमन्॥गौरीर्निऽमिमायसऽलिलाऽनितक्षतीकुर्वत्ये
कपदीमध्यमेनद्विपदीमध्यमेनचाऽदित्येनचचतुष्पदीऽदिग्भिरष्टापदीऽदिग्भिश्चावांतरऽदिग्भि
श्चनवपदीऽदिग्भिश्चावांतरऽदिग्भिश्चाऽदित्येनचसहस्राक्षराबहूदकापरमेव्यवनेतस्याए
षापराभवति॥४०॥तस्याःसमुद्राअधिविक्षरंऽतिवर्षंऽतिमेघास्तेनजीवंऽतिदिगाश्रया।
ऽणिभूताऽनिततःक्षरत्यक्षरमुदकंतत्सर्वाऽणिभूतान्युपजीवंऽतिगौर्व्याख्यातातस्याएषा
भवति॥४१॥गौरमीमेदनुवत्संऽमिषंतंमूर्धानंऽहिङ्ङकृणोन्मातवाउ॥सृक्काणंघर्ममऽभिवा
वश्नानाऽमिमाऽतिमायुंपयतेपयोऽभिः॥गौरन्वमीमेद्वत्संऽनिऽमिषंतमऽनिऽमिषंतमाऽदित्यऽमि
तिवामूर्धानमस्याऽभिऽहिङ्ङकरोन्मननायसृक्काणंसरणंघर्मंहरणमऽभिवावश्नानाऽमिमा
तिमायुंप्रप्यायतेपयोऽभिर्मायुऽमिवाऽदित्यऽमितिवावागेषामाध्यऽमिकाघर्मधुऽगितियाज्ञि

राम्
४४

काधेनुर्यथनेवऽधिनोलेवतिस्याएषाभवऽति॥४२॥उपह्वयेसुदुघांधेनुमेतांसुहस्तोगो
धुगुलदोहदेनां॥श्रेष्ठंसवंसविताऽसाविषंनोभीद्धोघर्मस्तदुषुप्रवोचं॥उपह्वयेसुदोह
नांधेनुमेतांकल्याणहस्तोगोधुगपिचदोग्ध्येनांश्रेष्ठंसवंसविताऽसुनोतुनइत्येषहिश्रेष्ठः
सर्वेषांसवानां।यदुदकंयद्धापयोयजुष्मदभीद्धोघर्मस्त्वंसुप्रब्रवीऽमेवाऽगेषामाध्यऽग्भिका
घर्मधुगित्याऽग्निका अघ्न्याहंतव्याभवत्यघ्न्योऽनिवातस्याएषाभवति॥४३॥सूयवसाद्भ
गवतीऽहिभूयाअथोवयंभगवंतःस्याम॥अद्धितृणमघ्न्येविश्वदानीऽपिबसुद्धमुदकमाच
रंती॥सुयवसाऽदनीभवेगतीऽहिभवाथेस्यनीवयंभगवंतःस्यामाऽद्धितृणमघ्न्येसर्वदाऽपिब
वसुद्धमुदकमाचरंतीतस्याएषापराभवति॥४४॥हिंङ्कृण्वतीवसुपत्नीवसूनांवत्समिछं
तीमनसाभ्यागात्॥दुहामश्विभ्यांपयोअघ्न्येयंसावर्द्धतांमहतेसौभगाय॥इतिसाऽग्निग

नि० उ०
४५

ह्याख्यातापथ्याः स्वस्तिः पंथा अंतरिक्षंतंनिवासात्तस्याएषाभवति ॥ ४५ ॥ स्वस्तिरिद्धि
प्रपथेश्रेष्ठारेक्णस्वत्यभियावाममेति ॥ सानोअमासोअरणेनिपातुस्वावेशाभवतुदेवगो
पा ॥ स्वस्तिरेवहिप्रपथेरेक्णस्वतीधनवत्यभ्येतियावसूनिवननीयानिसानोमागृहेसानि
रमणेसानिर्गमनेपातुस्वावेशाभवतुदेवीगोप्त्रीदिवाण्गोपायत्वितिदेवाएनांगोपायंत्विति
वोषाव्याख्यातातस्याएषाभवति ॥ ४६ ॥ अपोषाअनसः सरत्संपिष्टादहबिभ्युषी ॥ निय
त्सींशिश्नथद्वृषा ॥ अपासरदुषाअनसः संपिष्टान्मेघाद्बिभ्युष्यनोवाञ्छुरनितेरपिवोपमार्थे
स्यादनसइवशकटादिवानः शकटमानद्धमस्मिंश्चीवरमनितेर्वास्याज्जीवनकर्मण उपजी
वंत्येननृमेघोप्यन एतस्मादेवयभिरश्नियद्वृषावर्षेतामध्यमस्तस्याएषापराभवति ॥ ४७
॥ एतदस्याअनः शयेसुसंपिष्टंविपाश्या ॥ ससारसींपरावतः ॥ एतदस्याअनआशेतेसु

राम्
४५

संपिष्टमितरादिवंऽविपाशोऽविमुक्तपाशोऽससारोषाः परावतः प्रेऽरितवसः परागताहुक्ता
ध्याख्यातातस्याएषाभवति॥४८॥ अभिनइळायूथस्यमातास्मन्नदीभिरुर्वशीवागृणा
तु॥ उर्वशीवाबृहद्दिवागृणानाभ्यूर्ण्वानाप्रभृथस्यायोः॥ सिषक्तुनऊर्जव्यस्यपुष्टेः॥ अ
भिगृणातुनइळायूथस्यमातासर्वस्यमातास्मदभिनदीभिरुर्वशीवागृणातूर्वशीवा
बृहद्दिवामहद्दिवागृणानाऽभ्यूर्ण्वानाप्रभृथस्यप्रभृतस्यायोरयनस्यमनुष्यस्यज्योति
षोवोदकस्यवासेवतांनोभस्यपुष्टेरोदसीरुद्रस्यपत्नीतस्याएषाभवति॥४९॥ रथंनुमा
रुतंवयंश्रवस्युमाहुवामहे॥ आयस्मिन्तस्थौसुरणानिबिभ्रतीसचामरुत्सुरोदसी॥ र
थंक्षिप्रंमारुतंमेघवयंश्रवणीयमाह्वयामह आयस्मिन्तस्थौसुरमणीयानुदकानिबि
भ्रतीसचामरुद्भिःसहरोदसीरोदसी॥५०॥ श्येनोव्याख्यातआदायस्त्वादिष्टयासोमंम

न्येलेषत्वादेवनवोनवः परंमृत्योत्वेषुऽमित्थाप्रवोमहउदुज्योऽतिर्धाताददात्तुसोमस्यरा
ज्ञोथातोमध्यस्थानादेवगणाआऽविद्युन्मऽद्भिरारुद्रासोऽविष्ट्वीऽशमीऽविरूपाउदीरतामवरें
गिरसोनः सूर्यस्येववक्षुथेथ्यमथातोमध्यस्थानाः स्त्रियोदक्षस्यवायस्मैत्वंऽकेऽमिच्छंती
पावकानोमहोअर्णोयद्वाऽग्वदंतीदेवींवाचमऽन्विदनुमतेराकामहंऽसिनीवाऽलिकुहूमह
मन्यक्ष्रूषूर्वरीऽविष्णुभबऽलित्थैंद्राणीनाहमिंद्राऽणिगौरीऽर्मिमायनस्याः समुद्राऽगौरमी
मेदुपक्षयेसूयवसाऽद्धिंकृण्वतीस्वऽस्तिरिद्धिपोथाऽन्तदस्याऽभिनद्धारथंतुपंचाऽशानु
॥ ॥इतिऽनिरुक्तेउत्तरषट्केपंचमोध्यायः॥ ॥ॐअथातोद्युस्थानादेवतास्तासामश्वि
नौयद्व्यश्नुवातेसर्वंरसेनान्योज्योऽतिषान्योऽश्वैरऽश्विनाऽवित्यौर्णवाभस्तत्काऽवऽश्विनौद्यावापृ
थिव्याऽवित्येकेऽहोरात्राऽवित्येकेसूर्यचंद्रमसाऽवित्येकेराजानौपुण्यकृताऽवित्यैऽतिहासि

कालयोः कालऊर्ध्वमर्धरात्रात्प्रकाशीभावस्यानुविष्टंभमनुतमोभागोऽहिमध्यमोज्यो
तिर्भागिआदित्यस्तयोरेषाभवति ॥१॥ वसातिषुस्मचरथोऽसितौपेत्वाऽविव ॥ कदेदम
श्विनायुवमभिदेवाँ अगच्छतं ॥ इतिसाऽनिगदव्याख्यातावसातिषुस्मचरथोवसातयो
रात्रयोवसंतेस्मादुतरेतरात्रयोवक्केवाविहलेवाऽसितौपेत्वाऽविव ॥ अपेत्वाचरग्रहणंसुरात
योस्तयोः समानकालयोः समानकर्मणोः संस्तुतप्रायोयोरसंस्तवेनैषोऽर्द्धर्चोभिवदतिवा
सात्योन्यउच्यतेउषः पुत्रस्तवान्यइतितयोरेषापराभवति ॥२॥ इहेहजातासमवावशी
तामरेपसातन्वा नामभिः स्वैः ॥ जिष्णुर्वामन्यः सुमखस्यसूरिर्दिवो अन्यः सुभगः पु
त्रऊहे ॥ इहचेहचजातौसंस्तूयेतेपापेनाऽलिप्यमानयातन्वानामभिश्चस्वैर्जिष्णुर्वामन्यः
सुमहतोबलस्येरयितामध्यमोऽदिवोन्यः सुभगः पुत्रऊह्यत आदित्यस्तयोरेषापराभवति

।।३।। प्रातर्युजाऽविबोधयाऽश्विनावेहगछतां ।। अस्यसोमस्यपीतये ।। प्रातर्योऽगिभौऽविबो
धयाऽश्विनाऽविहागछतामस्यसोमस्यपानायतयोरेषापराभवऽति ।।४।। प्रातर्यजध्वमऽश्वि
नाऽहिनोतनसायमऽस्तिदेवयाअजुष्टं ।। उतान्योअस्मद्यजतेऽविचावः पूर्वः पूर्वोयजमा
नोवनीयान् ।। प्रातर्यजध्वमऽश्विनौप्रहिणुतनसायमऽस्तिदेवेज्या अजुष्टमेतद्यन्योस्म
द्यजतेऽविचावः पूर्वः पूर्वोयजमानोवनीयान्वनऽयितृतमस्तयोः कालः सूर्योदयपर्यंतस्त
ऽस्मिंनन्यादेवताऽभ्यंतउषावष्टेः कांऽतिकर्मणउछतेऽरितरामाध्यऽमिकास्तस्याएषाभ
वति ।।५।। उषस्तऽच्चित्रमाभेरास्मभ्यंवाऽजिनीवति ।। येनतोकंचतनयंचधामहे ।। उषस्त
ऽच्चित्रंचायनीयंमंहनीयंधनमाहरास्मभ्यमन्नवऽतियेनपुत्रांश्चपौत्रांश्चदधीमऽहितस्या
एषापराभवति ।।६।। एताउताउषसः केतुमक्रतपूर्वेअर्द्धेरजसोभानुमंजते ।। निष्कृ

ष्वाना आयुधानीव धृष्णवः प्रतिगावोरुषीर्यंति मातरः ।। एतास्त्याउषसः केतुमक्रुषत
प्रज्ञानमेकस्याएव पूजनार्थे बहुवचनं स्यात्पूर्वेर्धेंतरिक्षलोकस्य समंजते भानुना ।। नि
ष्कृण्वाना आयुधानीव धृष्णवः ।। निरित्येष समित्येतस्य स्थानए मीदेषां निष्कृतं जारि
णीवेत्यपि निगमो भवति प्रतियंति गावो गमनादरुषीरारोचनान्मातरो भासो निर्मात्र्यः
सूर्या सूर्यस्य पत्न्येषैवाभिसृष्टकालतमा तस्याएषा भवति ।। ७ ।। सुकिंशुकं शल्मलिं वि
श्वरूपं हिरण्यवर्णं सुवृतं सुचक्रं ।। आरोह सूर्ये अमृतस्य लोकं स्योनं पत्ये वहतुं कृणुष्व
।। सुकाशनं शंसनमलं सर्वरूपमप्यथोपमार्थे स्यात्सुकिंशुकमिव शाल्मलिमिति किंशुकं
कंशतेः प्रकाशयतिकर्मणः शाल्मलिः सुशरो भवति शरवान्वारोह सूर्ये अमृतस्य लोक
मुदकस्य सुखं पत्ये वहतुं कुरुष्व सविता सूर्यां प्रायच्छत्सोमाय राज्ञे प्रजापतये वेति च ब्रा

ल्तणांवृषाकपायीवृषाकपेःपत्नेषैवाभिसृष्टकालतमातस्याएषाभवति॥८॥वृषाकपा
यिरेवतिसुपुत्रआदुसुस्नुषे॥घसत्तइंद्रउक्षणःप्रियंकाचित्करंहविर्विश्वस्मादिंद्रउत्तरः
॥वृषाकपायिरेवतिसुपुत्रेमध्यमेनसुस्नुषेमाध्यमिकयावाचास्नुषासाधुसादनीतिवा
साधुसानिनीतिवास्वपत्यंतत्सनोतीतिवाप्राश्नातुतइंद्रउक्षणएतान्माध्यमिकान्त्संस्त्या
यानुक्षणउक्षतेर्वृद्धिकर्मणउक्षंत्युदकेनेतिवाप्रियंकुरुष्वसुखाचयकरंहविःसुखक
रंहविःसर्वस्मायइंद्रउत्तरस्तमेतद्रूमआदित्यंसरण्यूःसरणात्तस्याएषाभवति॥९॥
अपागूहन्नमृतांमर्त्येभ्यःकृत्वीसवर्णामदर्दुर्विवस्वते।उताश्विनावभरद्यत्तदासीदजहा
दुद्वामिथुनासरण्यूः।अप्यगूहन्नमृतांमर्त्येभ्यःकृत्वीसवर्णामदर्दुर्विवस्वतेऽश्विना
वभरद्यत्तदासीदजहाद्वौमिथुनौसरण्यूमध्यमंचमाध्यमिकांचवाचमितिनैरुक्तायमं

राम

चयमीचेत्यैऽतिहासिकास्तत्रेऽतिहासमाचक्षतेत्वाष्ट्रीसरण्यूर्विवस्वतआऽदित्याद्यमौऽमिथुनौ
जनयांचकारसासवर्णामन्यांप्रतिऽनिधायाऽश्वंरूपंकृत्वाप्रदुद्रावसऽविवस्वानाऽदित्यआऽश्वमे
वरूपंकृत्वातामनुसृत्यसंबभूवततोऽश्विनौजज्ञातेसवर्णायांमनुस्तदभिवाऽदिन्येषर्ग्भवति॥
१०॥त्वष्टादुहित्रेवहतुंकृणोतीतीदंऽविश्वंभुवनंसमेऽति॥यमस्यमातापर्युह्यमानामहोजाया
विवस्वतोननाश॥त्वष्टादुहितुर्वहनंकरोतीतीदंऽविश्वंभुवनंसमेतीमाऽनिचसर्वाणिभूतान्य
भिसमागच्छंतियमस्यमातापर्युह्यमानामहतोजायाऽविवस्वतोननाशरात्रिराऽदित्यस्याऽदित्यो
दयेंतर्द्धीयते॥११॥सऽविताव्याख्यातस्तस्यकालोयदाद्यौरपहततमस्काकीर्णरश्मिर्भवति
तस्यैषाभवति॥१२॥विश्वारूपाऽणिप्रऽतिमुंचतेकविःप्रासावीद्भद्रंद्विपदेचतुष्पदेऽविनाकम
ख्यत्सऽवितावरेण्योनुप्रयाणमुषसोऽविराजति॥सर्वाणिप्रज्ञानाऽन्यभिप्रऽतिमुंचतेमेधावीक

वि: क्रांतदर्शनो भवति कवतेर्वा प्रसुवति भद्रं द्विपाच्चश्च व्यचिख्यपंनाकं सविता वरणीय:
प्रयाणमनूषसो विराजत्यधोराम: सावित्र इति पशुसमाम्नाये विज्ञायते कस्मात्सामान्यादि
त्यधस्तात्तद्वेलायांतमो भवत्येतस्मात्सामान्यादधस्ताद्रामोधस्तात्कृष्ण: कस्मात्सामान्यादि
त्यग्निंचित्वान रामामुपेयाद्रामा रमणायोपेयते न धर्माय कृष्णजातीयैतस्मात्सामान्यात्कृ
कवाकु: सावित्र इति पशुसमाम्नाये विज्ञायते कस्मात्सामान्यादिति कालानुवादं परीत्य कृ
कवाको: पूर्वं शब्दानुकरणं वचेरुत्तरं भगो व्याख्यातस्तस्य काल: प्रागुत्सर्पणात्तस्यैषा भव
ति ॥१३॥ प्रातर्जितं भगमुग्रं हुवेम वयं पुत्रमदितेर्यो विधर्ता ॥ आध्रश्चिद्यं मन्यमानस्तुर
श्चिद्राजा चिद्यं भगं भक्षीत्याह ॥ प्रातर्जितं भगमुग्रं ह्वयेम वयं पुत्रमदितेर्यो विधारयिता स
र्वस्याध्रश्चिद्यं मन्यमान आढ्यो दरिद्रस्तुरश्चित्तुर इति यमनामतरतेर्वा त्वरतेर्वा त्वरयात्

णिगतिर्योराजाचिद्यंभगंभक्षीत्याहांधोभगइत्याहुरनुत्सृतोनदृश्यतेप्राशित्रमस्याक्षि
णीनिर्जघानेतिचब्राह्मणंजनंभगोगच्छतीतिवाजनंगच्छत्यादित्यउदयेनसूर्यःसर्त्तेर्वासु
वतेर्वास्वीर्यत्तेर्वातस्यैषाभवति॥१४॥उदुत्यंजातवेदसंदेवंवहंतिकेतवः।दृशेविश्वायसू
र्यं॥उद्वहंतितंजातवेदसंरश्मयःकेतवःसर्वेषांभूतानांदर्शनायसूर्यमितिकमन्यमादि
त्यादेवमवक्ष्यत्तस्यैषापराभवति॥१५॥चित्रंदेवानामुदगादनीकंचक्षुर्मित्रस्यवरुणस्या
ग्नेः।आप्राद्यावापृथिवीअंतरिक्षंसूर्यआत्माजगतस्तस्थुषश्च॥चायनीयंदेवानामुदग
मदनीकंख्यानंमित्रस्यवरुणस्याग्नेश्चापूपुरद्द्यावापृथिव्यौचांतरिक्षंचमहत्वेनतेनसूर्य
आत्माजंगमस्यचस्थावरस्यचाथयद्रश्मिपोषंपुष्यतितत्पूषाभवतितस्यैषाभवति॥१६
॥शुक्रंतेअन्यद्यजतंतेअन्यद्विषुरूपेअहनीद्यौरिवासि।विश्वाहिमायाअवसिस्वधावो

भद्राते पूषन्निह रातिरस्तु।शुक्लंते अन्य ल्लोहितंते अन्यद्यजतंते अन्यद्यज्ञियंते अन्यद्विष
मरूपे ते अहनी कर्म द्यौरिव चासि सर्वाणि प्रज्ञानान्यवस्य भवन्भाजनवती ते पूषन्निह दत्ति
रस्तु लस्यैषापरा भवति ॥१७॥ पथस्पथः परिपतिं वचस्या कामेन कृतो अभ्यानळर्कं ॥
स नो रासच्छुरुधश्चंद्राग्रा धियंधियं सीषधाति प्र पूषा ॥ पथस्पथो ऽधिपतिं वचनेन कामे
न कृतोभ्यानळर्कमभ्यापन्नोर्कमिति वा स नो ददातु चायनीयाग्राणि धनानि कर्म कर्म च नः
प्रसाधयतु पूषेत्यथ यद्विषितो भवति तद्विष्णुर्भवति विष्णुर्विशतेर्वा व्यश्नोतेर्वा तस्यैषा
भवति ॥१८॥ इदं विष्णुर्विचक्रमे त्रेधा निदधे पदं ॥ समूळ्हमस्य पांसुरे ॥ यदिदं किंच तद्वि
क्रमते विष्णुस्त्रिधा निधत्ते पदं त्रेधाभावाय पृथिव्यामंतरिक्षे दिवीति शाकपूणिः समा
रोहणे विष्णुपदे गयशिरसीत्यौर्णवाभः समूळ्हमस्य पांसुरेप्यायनेंतरिक्षे पदं न दृश्यते

ऽपिवोपमार्थेस्यात्समूळ्हमस्यपांसुलइवपदंनदृतइतिपांसवः पादैः सूयंतइतिवापं
नाः शेरतइतिवापंसनीयाभवंतीतिवा ॥१९॥ विश्वानरोव्याख्यातस्तस्यैषनिपातोभवत्यैं
द्र्यामृचि ॥२०॥ विश्वानरस्यवस्पतिमनानतस्यशवसः ॥ एवैश्चर्षणीनामूतीहुवेरथानां
॥ विश्वानरस्यादित्यस्यानानतस्यशवसोमहतोबलस्यैवैश्चकामैरयनैर्वैचर्षणीनांम
नुष्याणांमूत्याचपथारथानामिंद्रमस्मिन्यज्ञेह्वयामि वरुणोव्याख्यातस्तस्यैषाभवति
॥२१॥ येनापावकचक्षसाभुरण्यंतंजनाँअनु ॥ त्वंवरुणपश्यसि ॥ भुरण्युरितिक्षिप्रना
मभुरण्युः शकुनिर्भूरिमध्वानंनयतिस्वर्गस्यलोकस्यापिवोढ्हातत्संपातीभुरण्युरनेन
पावकख्यानेन । भुरण्यंतंजनाँअनु । त्वंवरुणपश्यसि ॥ तत्तेवयंस्तुमइतिवाक्यशेषोपि
वोत्तरस्यां ॥२२॥ येनापावकचक्षसाभुरण्यंतंजनाँअनु ॥ त्वंवरुणपश्यसि । विद्यामेषि

नि०उ०
५१

रजस्पृथ्वहाऽमिमानो अक्तुभिः । पश्यन्जन्माऽनि सूर्य ॥ त्वेषि धां रजश्च पृथु महांतं लोकमहा
ऽनिचऽमिमानोक्तुभी रात्रिभिः सह पश्यन्जन्माऽनि जातानि सूर्यऽपि वा पूर्वस्यां ॥२३॥ येनापा
वकचक्षसा भुरण्यंतं जनाँ अनु ॥ त्वं वरुण पश्यसि ॥ प्रत्यङ् देवानांऽविशः प्रत्यङ्ङुदेषि मानु
षान् । प्रत्यङ् विश्वं स्वर्दृशे ॥ प्रत्यङ्ङिदं सर्वमुदेषि प्रत्यङ्ङिदं ज्योतिरुच्यते प्रत्यङ्ङिदं सर्वम
ऽभिऽविपश्यसीत्यऽपि वैलस्यामेव ॥२४॥ येनापावकचक्षसा भुरण्यंतं जनाँ अनु । त्वं वरुण
पश्यसि । तेन नो जनानऽभिविपश्यसि केशी केशाऽरश्मयस्तैस्तद्वान्भवति काशनाद्वा प्रका
शनाद्वा तस्यैषा भवति ॥२५॥ केश्य१ग्निं केशीऽविषं केशीऽबिभर्त्ति रोदसी । केशीऽविश्वं स्वर्दृ
शे केशीदं ज्योतिरुच्यते ॥ केश्यऽग्निं चऽविषं चऽविषमित्युदकनामऽविष्णातेऽर्विपूर्वस्य स्नातेः
शुध्यर्थस्यऽविपूर्वस्य वा सचतेऽपि वा पृथिव्यौ च धारयति केशीदं सर्वमिदमऽभिऽविपश्यति

राम
५१

केशीदंज्योतिरुच्यतइत्यादित्यमाहाथाप्येतेइतरेज्योतिषीकेशिनीउच्येतेधूमेनाग्नीरज
साचमध्यमस्तेषामेषासाधारणाभवति ॥२६॥ त्रयःकेशिनऋतुथाविचक्षतेसंवत्सरेव
पतएकएषां ॥ विश्वमेकोअभिचष्टेशचीभिर्ध्राजिरेकस्यददृशेनरूपं ॥ त्रयःकेशिनऋ
तुथाविचक्षतेकालेकालेऽभिविपश्यंतिसंवत्सरेवपतएकएषामित्यग्निःपृथिवींदहति
सर्वमेकोऽभिविपश्यतिकर्मभिरादित्योगतिरेकस्यदृश्यतेनरूपंमध्यमस्याथयद्रश्मिभि
रभिप्रकंपयन्नेतितद्वृषाकपिर्भवतिवृषाकंपनस्तस्यैषाभवति ॥२७॥ पुनरेहिवृषाकपे
सुविताकल्पयावहै ॥ यएषःस्वप्ननंशनोऽस्तमेषिपथापुनर्विश्वस्मादिंद्रउत्तरः ॥ पुनरे
हिवृषाकपेसुप्रसूतानिवःकर्माणिकल्पयावहैयएषःस्वप्ननंशनःस्वप्नान्नाशयस्यादि
त्यउदयेनसोऽस्तमेषिपथापुनःसर्वस्मादिंद्रउत्तरस्तमेतब्रूमआदित्यंयमोव्याख्यात

स्तस्यैषाभवति ॥२८॥ यस्मिन्वृक्षेसुपलाशेदेवैःसंपिबतेयमः । अत्रानोविश्पतिःपिता
पुराणांअनुवेनति ॥ यस्मिन्वृक्षेसुपलाशेस्थानेवृतःक्षयेवा । पिवोपमार्थेस्याद्वृक्षइवसुप
